Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

SAMSKRITASRI

ஸம்ஸ்க்ருதஸ்ரீ:

A Monthly Journal of
Samskrit Education Society
தனி ப்ரதி
விலை ரூ. 4
MARCH 2020

ஸம்ஸ்க்ருத கல்விக்
கழக மாத இதழ்
212/13-1,
செயிண்ட் மேரிஸ் ரோடு,
மந்தைவெளி, சென்னை-28



धारायन्त्रविनिर्गताः जलकणाः भ्राजिष्णुवर्णोज्ज्वलाः
राधादेहलताप्रसूनशिखरे माध्वीकतां सङ्गताः।
कृष्णप्रेमतरङ्गरङ्गबहुलाः आनन्दसन्दोहदाः
पायासुः प्रणतार्तिभङ्गचतुराः संसारदावानलात्।।

ஒளிரும் வண்ணங்களால் திகழ்பவையும் ராதையின் உடலாகிய கொடியின் மலர்களின் நுனியில் தேனின் தன்மையைப் பெற்றவையும் கண்ணனின் காதல் அலையின் வண்ணத்தால் மலிந்தவையும் மகிழ்ச்சியின் செழிப்பைத் தருபவையும் வணங்குவோரின் துயரைப் போக்க வல்லவையும் நீர்தெளிப்பானிலிருந்து வெளிவந்தவையுமான நீர்த்துளிகள் ஸம்ஸாரமாகிய காட்டுத்தீயிலிருந்து காப்பாற்றட்டும்.

होल्युत्सवः १०.०३.२०२०

CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(24951402

THE SAMSKRIT EDUCATION SOCIETY (Regd) MADRAS

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

Secretary & Treasurer : Sri G. SITHARAMAN, F.C.A.
Editor and Publisher : S. SRINIVASA SARMA
Associate Editor : Dr. G. Sankaranarayanan
Department of Sanskrit,
SCSVMV Univeristy, Enathur,
Kanchipuram, Tamilnadu
Cell : 99941 03957

1.	ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன், ஆழ்வார்ப்பேட்டை	98843 12214
2.	ஸ்ரீமதி சாந்தி அசோக், மந்தைவெளி	24951402
3.	ஸ்ரீமதி கௌரீ கருணாகரன், மைலாப்பூர்,	24320544
4.	ஸ்ரீமதி ரமாசுந்தரராஜன், சென்னை -95,	65687635
5.	ஸ்ரீமத் பார்வதீ ராமசந்திரன் அண்ணா நகர்	26215719
6.	ஸ்ரீ R. முத்து கிருஷ்ண ன் கொரட்டூர்	872430
7.	ஸ்ரீ S. ரங்கநாத சர்மா, சேலையூர்	01720
8.	ஸ்ரீமதி புவனேச்வரீ ராஜகீழ்பாக்கம்	2047
9.	ஸ்ரீ K. ராஜேச்வரீ மாடம்பாக்கம்	9
10.	ஸ்ரீ S. ஹரிஹரன் நங்கைநல்லூர்	98414
11.	ஸ்ரீ S. அனந்தன், மதுராந்தகம்	9894709418
12.	ஸ்ரீ P.R. சுப்ரமண்யம், முகிலவாக்கம்	42649052
13.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய ஸ்ரீரங்கம்	2430632
14.	ஸ்ரீமதி ராஜம் சுந்தர், திருநெல்வேலி	9488326850
15.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன், திருநின்றவூர்	9445703470
16.	ஸ்ரீ R. ரங்கநாதன், காஞ்சீபுரம்	97910 55428
17.	ஸ்ரீ C.A. ஏகாம்பரம், கோயம்புத்தூர்	0422-2233242
18.	ஸ்ரீமதி டி.வி. ஜயலஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002,	0487-2382964
19.	ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், Mumbai East	09757115154
	ஸ்ரீ வி. கோதண்டராமன், Mrs. கீதா ரேகா,ஆதம்பாக்கம்	9444469638.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला : ४२ MARCH 2020 पुष्पम् : ०३

कलि : ५१२१ विकारी - मीनमासः ४२-०३

१. सम्पादकीयम्	४
२. बालीप्रत्यभिज्ञानशतकम्	५
३. रघुवंशम्	७
४. अष्टाङ्गहृदयम्	९
५. मन्त्रार्थचिन्तनम्	१२
६. तिरुक्कुरल्	१४
७. रूपकावली	१६
८. योगरहस्यम्	१८
९. श्रीकृष्णचरितम्	२१
१०. त्रिविधमौषधम्	२४
११. शास्त्रं ज्योतिःप्रकाशार्थम्	२६
१२. श्रीमहास्वामिनां वचः	३०
१३. योगम् अवगच्छामः	३३
१४. आदिशङ्करस्यानुभूत्यां मातृपितृगुरुदेवा	३७
१५. बालकथा	४०
१६. Hindu Concept of Law	४२
१७. श्रीमद्वेदान्तरामानुजमहादेशिक-वैभवमालिका	४३
१८. श्रव्यकाव्यभेदाः	४६
१९. पदरञ्जनी	४८

The Samskrit Education Society Established with the blessings of His Holiness **SRI MAHASWAMIGAL** of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:
Old 212/13-1, St.Mary's Road,
Mandaiveli, Chennai – 600 028.

PRESENT ACTIVITES
1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI Founder Editor
Vaidyasri
Sri S.V.RADHAKRISHNA SASTRI

Hon. Editor
Dr.N.VEEZHINATHAN

Editor and Publisher
Prof.SRI S.SRINIVASA SARMA

Associate Editor
Dr. G. SANKARANARAYANAN

Hon. Academic Advisors :
Dr.K.SRINIVASAN,
K.S.R.I.Chennai.
SMT. SANTA SRINIVASAN, SES,
Chennai.

Associate Editors :
Pandit S. Ranganatha Sarma,
Chennai.
Prof. G. Srinivasu, Kanchipuram.
Prof.C.V.Seshadri, Chidambaram.

Technical Assistants :
Dr. V. NAGARAJAN
Dr. S. THIAGARAJAN

SUBSCRIPTION RATES

ANNUAL	: Rs. 40/-
LIFE SUBSCRIPTION	: Rs. 400/-
PAGE DONATION	: RS.200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer.

DD/Cheque should be sent by Speed Post only

The Samskrit Education Society (Regd.),
Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.
Ph: 044 - 24951402 / Email: editorsamskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सम्पादकीयम्

सुधामयूखैरिव चित्तखेदं
लेखैर्हरन्ती बुधहृद्विलासैः।
जिज्ञासुचाकोरमुदे प्रवृत्ता
श्रीसंस्कृतश्रीः लसतात्सदेह।।

त्रिकरणैरितरसुखकारित्वं सतां लक्षणम्। तादृशस्थितिप्राप्तये चित्तशुद्धिः स्थैर्यञ्चापेक्षिते। तच्च शास्त्रविहितमार्गानुसरणेनैव सिद्ध्यति। तदाह कौटल्यः सुरुगुरुतुल्यः **कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिः इन्द्रियजयः शास्त्रानुष्ठानं वा,** इति। इन्द्रियजयस्तावन्न केवलं ऋषिव्यवहारः अपि च सामान्यजनैः अप्यनुसर्तव्योयं नियमः। नेयमुक्तिः असाध्या अलौकिकी वा। किन्तु साध्योयं व्यवहारः शास्त्रविहितकर्मानुष्ठानेन सदाचारप्रवर्तनेन वा। तदेतन्मनसि निधायैव पुराणेतिहासादयः तात्पर्यमुखानि चरित्राणि राजर्षप्रभृतीनां निरूप्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदिशन्ति। नायमुपदेशः केषाञ्चनैव। अपि च समग्राया मानवजातेरयमुपदेशः। त्रिकरणैरितरजनदुःखकरणं पापमिति, तोषणञ्च पुण्यमिति। अत आह

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

इति। अतः इतरजनदुःखजनकाः व्यवहाराः पापकरा इति उपकारजनकाश्च पुण्यकरा इति सिद्धम्। तदेतन्निश्चित्य सर्वाङ्गीणतयेतरजनतोषणाय यतेरन् येन मर्त्यजातिरप्यमर्त्यतामेष्यतीति निवेदयति सम्पादकवर्गः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बालीप्रत्यभिज्ञानशतकम्

Prof. ABHIRAJA RAJENDRA MISHRA
Formerly Vice-Chancellor, Varanasi

प्रतिक्षणं तटान्तेषु वेलाः प्रतिहता मुहुः।
शुभ्रडिण्डीरसन्दोहैर्दुग्धदोहाकृतिं गताः।।१०१।।

नातः परं धरा क्वापि दक्षिणस्थाद् ध्रुवादृते।
दृश्यते यावबालोकं प्रशान्तोदधिविस्तरम्।।१०२।।

उत्तरस्यां धनुष्कोटौ तनाहलाटसंज्ञितः।
शिवालयोऽस्ति नीरार्थस्थापितो यशसोच्छ्रितः।।१०३।।

क्रुद्धपाथोधिवीचीभिः प्रतियामं प्रतिक्षणम्।
मूलभूमेः परिच्छन्नं द्वीपमद्यापि रक्ष्यते।।१०४।।

पुनर्निर्माणकर्माणि प्रवर्त्यन्तेऽथ शासनैः।
शिवायतनरक्षायै यथा तन्नो क्षयं भजेत्।।१०५।।

इतः प्रस्थाय कौबेर्यां मेङ्गवीराज्यनिर्मितम्।
दृश्यते ननु विख्यातं तमनायूनमन्दिरम्।।१०६।।

प्राकारपरिखायुक्तं धारायन्त्रादिभूषितम्।
गोपुरत्रयसंश्लिष्टं मण्डपैर्बहुभिर्वृतम्।।१०७।।

मेरूणां भिन्नसंख्यानां राजते यत्र सन्ततिः।
नयनाकर्षिणी नूनं कलालङ्करणान्विता।।१०८।।

सर्वेऽपि हिन्दुसंस्काराः पार्श्वस्थे संग्रहालये।
दृश्यन्ते सम्मता बाल्यां दारुपट्टेषु चित्रिताः।।१०९।।

शबयात्राप्रयोज्योऽसौ राजवंशमहारथः।
वृषभेणान्वितस्तत्र मण्डपे दृश्यते स्थितः।।११०।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इतोऽप्यग्रेऽचिरं गत्वा सिंहराजपथान्तिके।
अद्भुतं दृश्यते रम्यं बेडुगुल्लामपुष्करः।।१११।।

प्राच्यां याम्यां शिलारुद्धो वारुण्यां घट्टसंकुलः।
शान्तनौकाविहाराणामालयो जलचारिणाम्।।११२।।

पार्श्ववर्त्तिनि कान्तारे श्मश्रुकूर्चभयङ्कराः।
यत्र तिष्ठन्ति निर्दोषा वालिसुग्रीववंशजाः।।११३।।

राजमार्गमुखे रम्यं सिंहराजपुरं स्थितम्।
यदासीद्रुचसाम्राज्ये राजधान्या प्रतिष्ठितम्।।११४।।

दृश्यतेऽत्र महाकारो बाल्यौदीच्यमहोदधिः।
यात्राव्यापारपोतानां सन्दोहैश्च समाकुलः।।११५।।

प्रस्थाय सिंहराजाच्च सिन्धुवायुसुखं वहत्।
सरीरितमतिक्रम्य घनारण्यपथस्थितः।।११६।।

क्वचित्सिन्धुकटस्थानि तिन्तिडीविपिनान्यपि।
पश्यन् विहारकेन्द्राणि गिलिमानुकमाश्रयेत्।।११७।।

(अनुवर्तते.....)

❀ भारतवाणी ❀

यश्च कार्यार्थतत्त्वज्ञो जानमानो न भाषते।
सोऽपि तेनैव मार्गेण लिप्यते नात्र संशयः। १.७.४

செய்தியின் உண்மையைத் தெரிந்தவனான ஒருவன் அதைச் சொல்லாது இருந்தால் அதனால் உண்டாகும் பாவத்தை அடைவான் என்பதில் ஐயமில்லை.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रघुवंशम्

Sri. R.RANGANATHAN,
Sanskrit Education Society, Kanchipuram

द्वादशसर्गः अशीतितमः श्लोकः

कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः।।

पदच्छेदः

कुम्भकर्णः, कपीन्द्रेण, तुल्यावस्थः, स्वसुः, कृतः, रुरोध रामं, शृङ्गीव, टङ्कच्छिन्नमनःशिलः।

शब्दरूपाणि

कुम्भकर्णः, तुल्यावस्थः, कृतः,

टङ्कच्छिन्नमनश्शिलः	-	रामशब्दवत्
कपीन्द्रेण	-	अका. पुं. तृ. एक।
स्वसुः	-	स्वसुः स्वस्रोः स्वसॄणाम्। ऋका. स्त्री. ष. एक।
रुरोध	-	रुरोध रुरुधतुः रुरुधुः। **रुध - आवरणे** इति धातोः लिटि प्र. पु. एक।
रामं	-	अका. पुं. द्वि. एक।
शृङ्गी	-	नका. पुं. प्र. एक।
इव	-	अव्य.

प्रतिपदार्थः

कपीन्द्रेण - வானரர் தலைவன் சுக்ரீவனால், स्वसुः - தங்கை சூர்பணகைக்கு, तुल्यावस्थः - சமமாக இருப்பவனாக,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कृतः - செய்யப்பட்ட, कुम्भकर्णः - கும்பகர்ணன், टङ्कट्छिन्नमनश्शिलः - உளியினால் வெட்டப்பட்ட செந்நிற தாதுக்களையுடைய, शृङ्गी इव - மலைபோல், रामं - ராமரை, रुरोध - எதிர்த்தான்.

व्याकरणविशेषः

कपीन्द्रेण - कपीनामिन्द्रः तेन।

तुल्यावस्थः - तुल्या अवस्था यस्य सः।

टङ्कच्छिन्नमनःशिलः - टङ्केन छिन्ना मनः शिला यस्य सः।

कोषः

टङ्कः - टङ्कः पाषाणदारणः।

मनःशिला - धातुः मनःशिलाद्यद्रौ।

भावार्थः

सुग्रीवेण कर्णनासाच्छेदेन शूर्पणखायाः सदृशो विकलाङ्गः कुम्भकर्णः छिन्नरक्तवर्णधातुविशेषः पर्वत इव राममवरुद्धवान्।।

(अनुवर्तते.....)

भारतवाणी

अहिंसा परमो धर्मः सर्वप्राणभृतां स्मृतः।
तस्मात्प्राणभृतः सर्वान्न हिंस्याद्ब्राह्मणः क्वचित्।। १.११.१२

துன்புறுத்தாமை என்பது எல்லா உயிர்களுக்கும் உயர்ந்த நெறியாகும். ஆகவே அந்தணன் எந்த ஒரு உயிரையும் துன்புறுத்தக்கூடாது

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अष्टाङ्गहृदयम्

Prof. S. SWAMINATHAN
Sri Jayendra Saraswathi Ayurveda College, Poonamallee

तीक्ष्णैर्वमननस्याद्यैर्लघुरूक्षैश्च भोजनैः ।
व्यायामोद्वर्तनाघातैर्जित्वा श्लेष्माणमुल्बणम् ।।१९
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः।
पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक्।। २०
सहकाररसोन्मिश्रानास्वाद्य प्रियया ऽर्पितान्।
प्रियास्यसङ्गसुरभीन् प्रियानेत्रोत्पलाङ्कितान्।। २१
सौमनस्यकृतो हृद्यान्वयस्यैः सहितः पिबेत्।
निर्गदानासवारिष्टसीधुमार्द्वीकमाधवान्।। २२
शृङ्गबेराम्बु साराम्बु मध्वम्बु जलदाम्बु च।
दक्षिणानिलशीतेषु परितो जलवाहिषु।। २३
अदृष्टनष्टसूर्येषु मणिकुट्टिमकान्तिषु।
परपुष्टविघुष्टेषु कामकर्मान्तभूमिषु।। २४
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत्सुखी।। २५
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत्।

तीक्ष्णैः वमननस्याद्यैः - ஊடுருவிவெளிக்கொணரக் கூடிய வாந்தி, மூக்கில் மருந்து விடுதல் போன்றவற்றாலும், लघुरूक्षभोजनैः - எளிதில் செரிக்கக் கூடிய, வறட்சியான உணவு வகைகளாலும், व्यायाम - उद्वर्तन - आघातैश्च - தேகப்பயிற்சி, வறட்சியான பொடிகளைக் கொண்டு உடலில் தேய்த்து விடுதல் மற்றும் பாதங்களை உடலின் மீது

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

வைத்து அழுந்தத் தேய்த்துவிடுதல் முறையாலும், उल्बणं श्लेष्माणं जित्वा - சீற்றமடைந்துள்ள கபதோஷத்தை அடக்கி, स्नात्वा - குளித்துவிட்டு, कर्पूरचन्दन-अगरुकुङ्कुमैः अनुलिप्तः - கற்பூரம், சந்தனம், அகில், குங்குமம் ஆகியவற்றை அரைத்து, உடலில் பூசி, पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक् - பழைய வாற்கோதுமை, கோதுமை, தேன், சூலத்தில் குத்தி நெருப்பில் வாட்டிய ஜாங்கல மாமிசமும் சாப்பிட்டு सहकाररसोन्मिश्रान् - மாம்பூவினுடைய சாறு சேர்க்கப்பட்டதும், प्रियया आस्वाद्य अर्पितान् - மனைவியினுடைய வாய்-ஸ்பர்சத்தால், प्रियानेत्र-उत्पलाङ्गिकतान् - மனைவியினுடைய கண்ணில் பட்டதால் அழகானதும், सौमनस्यकृतः - மனதிற்கு உல்லாசத்தை தரக்கூடியதும், हृद्यान् निगतान् - சுவை நிறைந்ததும், பழக்கமுள்ளதுமாகிய, आसव अरिष्टसीधु माद्वीकमाधवान् - ஆஸவம், அரிஷ்டம், சீது, மார்த்வீகம், மாதவம் எனும் மதுபானங்களை, वयस्यैः सहितः पिबेत् - தன் வயதொத்த நண்பர்களுடன் அமர்ந்து பருகவேண்டும், शृङ्गिवेराम्बु - சுக்கு வேகவைத்த தண்ணீரை, साराम्बु - வேங்கைமரப்பட்டை சேர்த்து வேகவைத்த தண்ணீரையோ, मध्वम्बु - கோரைக்கிழங்கு சேர்த்துக் காய்ச்சிய வென்னீரையோ जलदाम्बु वा - மழை நீரையோ குடிக்கப் பயன்படுத்தலாம். दक्षिणानिलशीतेषु – தெற்கிலிருந்து வரும் காற்றுபட்டுக் குளிர்ந்ததும், परितः जलवाहिषु - சுற்றுப்புறத்தில் நீர்வழிந்தோடிக் கொண்டிருக்கக் கூடியதும், अदृष्टनष्टसूर्येषु - சிறிது தெரிவதும், தெரியாமல் இருப்பதுமாகிய சூரியனோடு

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

கூடியதும், मणिकुट्टिमकान्तिषु- ரத்தினக்கல் போன்ற ஜ்வலிப்புடன் கூடிய தரையுடையதும், परपुष्टविघुष्टेषु - குயிலினுடைய கானத்தால் கோஷமேற்-பட்டதும், कामकर्मान्तभूमिषु - காமகேளிக்கைகளில் ஈடுபடக் கூடிய அழகிய இடங்களைக் கொண்டதும், विचित्रपुष्पवृक्षेषु- பலவகைப்பட்ட புஷ்பங்களையுடையதும், மரங்களால் சூழப்பட்டதும், सुगन्धिषु काननेषु - நறுமணத்துடன் கூடிய பூங்காவனங்களில் அமர்ந்து, चित्राभिः गोष्ठीकथाभिः सुखी - பலசுவையான கதைகளை கூட்டாக அமர்ந்து சொல்லிக் கொண்டும் கேட்டுக்கொண்டும் சுகமாக, मध्याह्नं गमयेत् - மதிய நேரத்தைக் கழிக்கவேண்டும். गुरुशीतदिवास्वप्न-स्निग्धाम्लमधुरान् त्यजेत् - எளிதில் செரிக்காத, குளிர்ச்சியான, நெய்ப்புடன் கூடிய, புளிப்பு மற்றும் இனிப்பு நிறைந்த உணவுவகைகளையும் பகல் தூக்கத்தையும் (வஸந்த ருதுவில்) தவிர்க்க வேண்டும்.

(अनुवर्तते.....)

❀ भारतवाणी ❀

पित्रा पुत्रो वयःस्थोऽपि सततं वाच्य एव च।
यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः।। १.३८.४

மகன் வயது வந்தவனாயிருந்த போதும் அவன் எப்படி நற்பண்புடையவனாவானோ எப்படி புகழ் அடைவானோ அப்படி அவனுக்கு தந்தை உபதேசிக்க வேண்டும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मन्त्रार्थचिन्तनम् - ३१ वैज्ञानिकी वैदिकी पृथिवीस्तुतिः

Dr. M. JAYARAMAN
Krishnamacharya Yoga Mandiram, Chennai

स्तोमासस्त्वा विचारिणि प्रतिष्टोभन्त्यक्तुभिः।
प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि।।

ऋक्संहिता ५.८२.२

अस्य मन्त्रस्य ऋषिः भौमः अत्रिः । इयं च ऋक् पृथिवीदेवताका। मन्त्रस्यास्य अनुष्टुप् छन्दः।

सायणभाष्यानुसारी मन्त्रार्थः

हे पृथिवि! त्वं विचारिणि - विविधं चरणशीला। हे देवि! त्वां स्तोतारः अक्तुभिः गमनशीलैः स्तोत्रैः अभिष्टुवन्ति। भवती अर्जुनी! शुभ्रवर्णा गमनशीला वा। अश्वमिव हेषन्तं उद्वृत्तं अनियन्त्रितगमनं आकाशं पूरयन्तं मेघं प्रास्यसि प्रक्षिपसि।

विवरणम्

एषा काचित् अतिरमणीया पृथिवीस्तुतिः वैज्ञानिकी च इति भाति। प्रथमः वैज्ञानिकसम्मतः अंशः अयम् - अर्जुनी, विचारिणी इति पदाभ्यां व्यज्यते यत्- पृथिवीचरणशीलतया महर्षिणा अत्रिणा दृष्टास्ति। ऋग्वेदस्तु बहुसहस्रवर्षपुरातनः। तादृशे वैदिके साहित्ये पृथिवी चरणशीला इत्याख्यातास्ति। पृथिवी चलनशीला इति केभ्यश्चिदेव शतकेभ्यः पूर्वम् कोपर्निकस् प्रमुखैः विज्ञानिभिः विज्ञाता। तावत् पर्यन्तं पृथिवी स्थिरा इत्येव धारणासीत्। इदं ज्ञानं मन्त्रद्रष्ट्रा

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ऋषिणा अत्रिणा बहुसहस्रवर्षेभ्यः पूर्वमेव कथिता इति विस्मयावहः प्रथमः वैज्ञानिकः विषयः। महर्षिणा अत्रिणा पृथिवीविशेषणभूतयोः विचारिणी, अर्जुनी इति पदयोः अन्यः एव अर्थः अभिप्रेतः इति यदि केचित् कथयेयुः तथापि - सायणाचार्यस्य भाष्यकर्तुः सम्मतः अयमर्थः इत्यतः न्यूनपक्षे सामान्ययुगस्य चतुर्दश शतमाने पृथिव्याः चरणशीलत्वं ज्ञातमस्ति भारतीयैः इति ग्रहीतुं शक्यते। कोपर्निकस्-प्रभृतयः तु षोडशशतमाने आसन्।

द्वितीयः वैज्ञानिकसम्मतः अंशः -

पृथिवी एव मेघं क्षिपति अन्तरिक्षे इति अत्रिमहर्षिः कथयति मन्त्रेऽस्मिन्। तन्नाम पृथिव्यां विद्यमानं जलमेव सूर्यरश्मिना सङ्गृहीतं मेघायते इति तस्य तात्पर्यं प्रतिभाति। अयमपि आधुनिक-वैज्ञानिकसम्मतविषयः एव।

एतन्मन्त्रद्रष्टुः नामापि अवधानार्हम्। अयं भौमः इति नामयुक्तः। तन्नाम प्रायः भूमिसम्बद्धः, तद्विषये दत्तावधानः, तद्ध्यानपरायणः इति। अतः अयमपि भूमिविषयकं तथ्यं कथितवान् आर्षः विज्ञानी इत्येव सम्माननार्हः।

अयं ऋषिः कविरपि यतो हि रमणीयतया मेघगर्जनस्य अश्वहेषाम् उपमानरूपेण कल्पयति। अन्ततः, अस्मिन् मन्त्रव्याख्याने अविद्यमानः वैज्ञानिकः अर्थः नैव कल्पितः। किन्तु स्वभावतः द्योतमानः शब्दार्थः एव विवृतः इत्यवधानार्हम्।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्लोकानुरूपः - तिरुक्कुरल्

112. நலம் புனைந்துரைத்தல் - नायिका-गुणसंस्तुतिः

श्रीकलियन् रामानुजजीयर् (भूतपूर्वः),
नाङ्गनेरि

நன்னீரை வாழி அனிச்சமே நின்னினும்
மென்னீரள் யாம்வீழ் பவள்.
शिरीषसुम जीव त्वं चिरमत्यन्तपेशल।
त्वत्तोऽप्यत्यन्तमृदुला कामिनी मे प्रिया पुनः।।

மலர்காணின் மையாத்தி நெஞ்சே இவள்கண்
பலர்காணும் பூவொக்கும் என்று.
सर्वाऽऽलक्ष्यसुमान्यत्र कमलादीनि रे मनः।
अस्या नेत्रनिभानीति तान्यालोक्य विमुह्यसि।।

முறிமேனி முத்தம் முறுவல் வெறிநாற்றம்
வேலுண்கண் வேய்த்தோ ளவட்கு.
तनुः किसलयं मुक्ता स्मितं गन्धस्सुमोहकः।
अक्षिणी साञ्जने भाले वंशांसाया लसन्ति वै।।

காணிற் குவளை கவிழ்ந்து நிலன்நோக்கும்
மாணிழை கண்ணொவ்வேம் என்று.
स्वलङ्कृतानेत्रसद्रीचीनानि न स्मो वयन्त्विति।
अधोमुखान्युत्पलानि स्युः पश्येयुर्यदि स्वयम्।।

அனிச்சப்பூக் கால்களையாள் பெய்தாள் நுகப்பிற்கு
நல்ல படாஅ பறை.
शिरीषकुड्मलानां हि गुच्छं मूर्ध्ना वहत्यसौ।
सुकोमलतमं मध्यं नूनं भग्नं भविष्यति।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

மதியும் மடந்தை முகனும் அறியா
பதியிற் கலங்கிய மீன்.
शशाङ्कस्य विमुग्धाया मुखस्यापि विवेचने।
अक्षमाणि महर्क्षाणि भ्राम्यन्ति व्याकुलानि खे।।

அறுவாய் நிறைந்த அவிர்மதிக்குப் போல
மறுவுண்டோ மாதர் முகத்து.
क्षयवृद्धी प्राप्नुवाने कलङ्कोऽस्ति निशाकरे।
यथा तद्वन्मुखेऽस्याः किं सुन्दर्या लक्ष्म वर्तते।।

மாதர் முகம்போல் ஒளிவிட வல்லையேல்
காதலை வாழி மதி.
चन्द्रमस्त्वं चिरं जीव यदि त्वमपि शक्नुयाः।
ललनामुखवद्भातुं कमनीयतरो भवेः।।

மலரன்ன கண்ணாள் முகமொத்தி யாயின்
பலர்காணத் தோன்றல் மதி.
प्रफुल्लसुमाक्ष्या हि मुखसाम्यं यदीच्छसि।
नोदीयास्तर्हि राकेश, सर्वेषां दृष्टिगोचरः।।

அனிச்சமும் அன்னத்தின் தூவியும் மாதர்
அடிக்கு நெருஞ்சிப் பழம்.
शिरीषकुसुमान्यत्र तथा हंसप्रतूलिकाः।
कण्टकीक्षुरकाण्येव सुन्दरीमृदुपादयोः।।

(अनुवर्तते.....)

Articles for SAMSKRITASRI can be sent to:
editorsamskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रूपकावली - नाचिकेतम्

Prof. VISHNU POTTY. V.S.
Kanchipuram

नचिकेताः चिन्तामग्नः इतस्ततः चलति

यज्ञदत्तः उपागम्य किमुक्तवन्तः पितरस्तव।

नचिकेताः वैवस्वताय मां दास्यन्तीत्युक्तवन्तः।

यज्ञदत्तः तदेव किं चिन्ताकारणम्। नैवमुक्तवन्तः स्युः। त्वया कदाचिदन्यथा चिन्तितमिति मन्ये।

नचिकेताः न न। एवमेवोक्तवन्तः।

यज्ञदत्तः तर्हि कार्यान्तरव्यग्रतया कोपेन स्युः।

नचिकेताः नन्वैतदेव ममपि चिन्तापदम्। शिष्यवृत्त्या बहूनां शिष्याणां मुख्यः सन् वर्ते। बहूनाञ्च मध्यमः सन्नपि। परमाधमो भूत्वा नैतावता व्यवहारमकरवम्। तादृशं मां मृत्यवे ददामीति किमर्थमुक्तं पितृचरणैरिति न जानामि।

यज्ञदत्तः तर्हि का चिन्ता। नूनं क्रोधवशादेव।

नचिकेताः प्रयोजनमनपेक्ष्य क्रोधवशादुक्तवन्तः इत्येवाहमपि चिन्तयामि। तथापि तत्र उत्तमपुत्रो भूत्वा पितुर्वचः मृषा अहं कथं कुर्याम्।

यज्ञदत्तः तर्हि पितरः प्रमाणम्।

नचिकेताः एवमेव करिष्यामि।

(उभौ निष्क्रान्तौ)

(ततः प्रविशति उपविशन्।

वाजस्रवसः अञ्जलिं बद्ध्वा पुरतस्तिष्ठन् नचिकेताश्च।)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नचिकेताः पितः भवन्तः मां वैवस्वताय दत्तवन्तः तत्कदाचित्कोपेन वाचमुदीरितं स्यात्।

वाजस्रवसः पुत्र ! एवमेव कोपेन मया यत्किञ्चिद्भणितम्। मनसि अन्यथा न चिन्तनीयम्। मा विषादं कुरु।

नचिकेताः नात्राहं विषादं करोमि। किन्तु यमं गन्तुमनुमतिं पृच्छामि।

वाजस्रवसः एवन्न किमर्थं वा प्रेषणीयोऽसि।

नचिकेताः भवन्तः मद्गुरवः। अस्माकं पूर्वजा अपि सद्धर्मनिरताः आसन्। आधुनिका अपि वृद्धगुरुजनाः अस्मदीयाः सदाचारनिष्ठाः। तैरपि मृषावृत्तं किञ्चिन्नाचरितम्। न च वचः मृषा कृत्वा कश्चिदजरामरो भवति। मनुष्यः सस्यमिव म्रियते। मृत्वा च पुनराविर्भवति। एवमनित्ये लोके मृषाकरणेनालम्। भवत्तः अधीतोऽयं विषयः। अतः सता पुत्रेण मया भवद्वचनमलीकं कर्तुं न शक्यते। तस्मात्कृपया मां यमाय प्रेषयन्तु।

वाजस्रवसः सङ्कटे पतितोऽस्मि।

नचिकेताः यमं गत्वा सङ्कटान्मोचयिष्यामि।

वाजस्रवसः पुत्र मया यदुक्तं तत्र सार्थकत्वन्न चिन्तनीयम्। अत्रैव चिरं सुखी भव।

नचिकेताः अयं मम समयः।

वाजस्रवसः तर्हि स एव प्रमाणम्। पन्थानस्सन्तु ते शिवाः।

(निष्क्रान्तौ)

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

योगरहस्यम् - ३१

Prof. S. VENUGOPALAN
SJSACH, Nazarathpet, Chennai

गतपर्याये **शब्दार्थप्रत्ययानाम् इतरेरताध्यासात् सङ्करः, तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्** इति संयमसिद्ध्या प्राप्यमानानां सिद्धीनां मध्ये आदिमा सिद्धिः निरूपिता। तदनु अधुना **संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्** (यो.सू.३.१८) इति सूत्रं निरूप्यते। संस्क्रियते जीवः अनेन इति करणव्युत्पत्त्या घञन्तः अयं संस्कारशब्दः। तस्य साक्षात्करणात् पूर्वपूर्वजन्मसु यद्यद्योनिषु जन्मान्यभवन् तत्सर्वमपि योगी बोद्धुं प्रभवति। तथा हि द्विविधाः चित्तस्य वासनारूपाः संस्काराः। स्मृतिक्लेशानां हेतवः संस्काराः अनुभवक्लेशजाः एवं कर्मजाः सुखदुःखहेतवः इति इमे द्विविधाः संस्काराः चित्तस्य धर्माः पूर्वजन्मपरम्परासञ्चिताः साक्षात्कारो भवति। समान्यतया वक्तव्यं चेत् इत्थं वक्तव्यं स्यात् यत् प्राथमिकाः संस्काराः स्मृतिमात्रोत्पादनफलाः, द्वितीयास्तु जात्यायुर्भोगलक्षणविपाकहेतवः, यथा धर्माधर्माख्याः। तेषु संस्कारेषु यदा योगी संयमं करोति एवं **मया सोऽर्थः अनुभूतः**, एवं **मया सा क्रिया निष्पादिता** इति पूर्ववृत्तम् अनुसन्दधानः भावयन्नेव प्रबोधकमन्तरेण उद्बुद्धसंस्कारः योगी अतीतं सर्वं स्मरति। क्रमेण साक्षात्कृतेषु उद्बुद्धेषु संस्कारेषु पूर्वजन्मानुभूतानपि जात्यादीन् प्रत्यक्षेण पश्यति। विषयेऽस्मिन् भगवान् जैगीषव्यः उदाहरणम्। तस्य किल योगिवर्यस्य प्रकृतिवशिनः संस्कारसाक्षात्कारात्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दशसु महाकल्पेषु देवतिर्यङ्नरादियोनिषु जन्मपरम्परां साक्षात्कृतवतो दिव्यविवेकख्यातिः प्रादुरभवत्। तं भगवान् आवट्यः अप्राक्षीत् - भगवन् ! त्वया दृष्टेषु दशकल्पेषु सुखदुःखयोर्मध्ये किमधिकयता अनुभूतमिति। तदुत्तरमाह जैगिषण्यः - हन्त भोः ! आयुष्मन् ! देवनरादिषु योनिषु पुनःपुनः उत्पद्यमानेन मया यत्किञ्चिदनुभूतं तत्सर्वं दुःखमेवेति। तदा आवट्यः आह - किं प्रकृतिवशित्वमपि दुःखमेव? येन दिव्याः भोगाः अक्षयाः सङ्कल्पमात्रेणोपतिष्ठन्ते इति। तदा स उवाच - सत्यम् ! लौकिकसुखापेक्षया प्रधानविशत्वम् अनुत्तमम्, परं कैवल्यापेक्षया तदपि दुःखमेव, यतः तृष्णातन्तुरनुच्छिन्नः सर्वदुःखाकरः। तद्विच्छेदात् कैवल्यसुखं प्रसन्नमनुत्तमम् इति। व्यासभाष्यस्था आख्यायिका इयम्। अत्र काचिदाशङ्का भवितुमर्हति यत् यत्र संयमः तस्य साक्षात्कारः इति युज्येत, परं संस्कारसंयमात् पूर्वजन्मज्ञानं कथं भवितुमर्हति। सत्यमेव। सानुबन्धसंस्कारसंयमात् अनुबन्धत्वेन पूर्वजन्मनः ज्ञानम् उपपन्नमिति बोद्धव्यम्। अस्मिन् विषये सिद्ध्यन्तरमपि प्रोच्यते भगवता पतञ्जलिना, **प्रत्ययस्य परचित्तज्ञानम्** इति (३.१९)। तथा च अयमर्थः, संयमात् पूर्वसूत्रात् अनुवर्तते। तेन प्रत्ययस्य केनचित् मुखरागादिना लिङ्गेन गृहीतस्य परेषां चित्तस्य संयमं यदा करोति योगी, तदा परकीयचित्तस्य वृत्तीनां व्यवहारमपि ज्ञातुं प्रभवति सः। तस्य परकीयस्य चित्तं सरागं विरागं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वेति ज्ञातुं प्रभवति इत्यर्थः। अत्र अन्यथाऽपि व्याख्यानं दृश्यते। तथा च रागादिमत्याः स्वीयचित्तवृत्तेरपि प्रत्ययस्य संयमेन आश्रयादिरूपैः अशेषविशेषैः साक्षात्करणात् परस्य चित्तमपि सङ्कल्पमात्रेण ज्ञातुं प्रभवति योगी। अतः एव भक्तानां पामराणां विविधदुष्कर्मपरिपाकवशात् रोगादिदुःखैः परितप्यमानानां स्वसन्निधौ आगमनमात्रेण पवित्रीकृतानां चित्तवृत्तीः तेषां मुखदर्शनेनैव विजानद्भिः योगिभिः तेषां दुःखपरिहाराय उपायाः उच्यन्ते। तेषु अव्याजकरुणया महान्तः योगिनः स्वपतपोबलेन तेषां भक्तानां मनःशान्तिमपि वितन्वते। दुःखेभ्यः तान् भक्तान् मोचयन्ति च। तदुक्तं भगवता श्रीकृष्णेन -

अनन्याः चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।

(श्रीमद्भगवद्गीता ९.२२) इति।

सिद्धपुरुषाः विरागिणः शमदमादिसाधनषट्कसम्पन्नाः योगिनः परमेश्वरस्य प्रतिनिधयः इह भुवि विचरन्तिं ईश्वरभक्तानुद्धर्तुकामाः। तेषु शङ्कराचार्याः अग्रेसराः। **शम्भोर्मूर्तिश्चरति भुवने शङ्कराचार्यरूपा** इत्यभियुक्तोक्तिः इममेव अभिप्रायम् ऊरीकरोति। एवं च वयमपि कर्माधीनाः क्लेशकर्मतद्विपाकांशयैः परामृष्टाः जीवाः शङ्कराचार्यादिगुरून् परम्परमासम्प्राप्तान् आश्रित्य तेषां चरणेषु भक्तिं विदधानाः सुखमाप्नुयाम।।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कलिकल्मषघ्नं श्रीकृष्णचरितम् - ८

(वसुदेवचनेन देवक्याः वधोद्योगात्कंसस्य निवृत्तिः, देवकीपुत्राणां कंसकर्तृको वधश्च)

Dr. M. VINOTH
French Institute of Pondicherry,

पूर्वस्यां सञ्चिकायां भगवतः मानुष्यावतारं दृष्ट्वा विस्मयङ्गतायाः देवक्याः स्तवनं प्रतिपादितम्। एवं मातृपितृभ्यां स्तुतः सन् स्वदिव्यमङ्गलरूपप्रदर्शनस्य कारणं वक्तुं पूर्ववृत्तान्तमाह - इतः पूर्वं तृतीये जन्मनि स्वायम्भुवमन्वन्तरे त्वं (देवकी) पृश्निः अभूः। त्वद्भर्तायं वसुदेवः तदा सुतपा नाम प्रजापतिरासीत्। तदा उभावपि युवां यतः प्रजासर्गे ब्रह्मणा आदिष्टौ ततः इन्द्रियाणि नियम्य उत्कृष्टं तपः चक्राथे। क्रमेण प्राप्तान् सर्वान् ऋतुधर्मान् सहमानौ सन्तौ प्राणवायुञ्च निरुध्य, मनसः यानि मलानि तानि निर्धूय, जीर्णानि वृक्षेभ्यो गलितानि पर्णानि तथा अनिलं च आहारत्वेन स्वीकृत्य (अनेन तपसः परत्वं प्रतिपाद्यते) मत्सकाशाद् वरमिच्छन्तौ रागादिदोषेभ्यः अकलुषितेन मनसा माम् आराधयाञ्चक्राथे। एवम् अन्येनासाध्यं यच्च कठोरं तपः तदाचरतो उभयोः युवयोः दिव्यानि देवमानपरिमितानि द्वादशवर्षसहस्राणि व्यतिक्रान्तानि। तादृशेन कठोरतपसा श्रद्धया भक्त्या च सन्तुष्टोऽहं वरप्रदायकः अनेनैव वपुषा प्रादुर्भूय वरः ब्रियतामिति आह। तदा युवाभ्यां मादृशः सुतः याचितोऽहम्। शब्दादिविषयान् अननुभूतौ अनपत्यौ दम्पती युवां तदा मदीयया मायया मोहितौ भूत्वा अपवर्गाख्यं मोक्षमपि न याचितवन्तौ। मादृशसुतप्राप्तिरूपं वरं प्राप्य मद्गमनानन्तरं युवां शब्दादिभोगान् अनुभुक्तवन्तौ। तदा रूपौदार्यादिगुणैः युक्तोऽहमेव युवयोः पुत्रत्वेन जनिं प्राप्य पृश्निगर्भत्वेन ख्यातः। अग्रे जन्मनि पुनः युवामुभावपि अदितिकश्यपरूपेण जनिं लेभाथे। तदा पुनरहमेव इन्द्रस्य

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अनुजत्वेन उपेन्द्र इत्याख्येन पुत्रत्वेन युवयोः जातः। तथैव वामनत्वाद् वामन इत्यपि विख्यातः। अदितिकश्यपरूपौ युवामेव अधुना देवकीवसुदेवरूपेण जनिम् आप्नुतम्। अतश्च अस्मिन्नपि जन्मनि अहमेव युवयोः पुत्रत्वेन जनिम् आप्तवान्। इदं तत्त्वं ख्यापयितुमेव चतुर्भुजत्वेन दर्शनं ददौ। एतादृशं स्वरूपं त्यक्त्वा सामान्यरूपेण यदि जनिम् आप्तवान् स्यां तर्हि मदवतारवैशिष्ट्यं न जानीयाताम्। सर्वदा मां पुत्रत्वेन भावयन्तावपि युवां कदाचिद् ब्रह्मभावेनापि मां चिन्तयन्तौ नूनं परां मद्गितं यास्यतः। तदत्र भगवतः पद्यम् -

युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत्।
चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं पराम्।।

(श्रीमद्भागवतम् १०.३.४५) एवमाह भगवान् विष्णुः।

अथ शुकाचार्यः परीक्षिन्महाराजम् आह - एवं सम्पूर्णं पूर्ववृत्तान्तम् उक्त्वा भगवान् तूष्णीम् आसीत्। ततश्च सम्पश्यतोः पित्रोः सम्मुखे एव स्वमायया प्राकृतं शिशुरूपम् आप। ततः वसुदेवः भगवता चोदितः सन् तं शिशुं (भगवन्तं) स्वीकृत्य सूतिकागृहात् बहिः गन्तुं यदा उद्युक्तः तदा तत्र गोकुले नन्दस्य भार्यायां यशोदायां प्रकृतेः अभीष्टा देवता योगमायाख्या पुत्री अजनि। तदा सा योगमाया सर्वानपि जनान् स्वीयमहिम्ना मूर्च्छयाञ्चकार। तदा कारागारे पिहितेषु द्वारेषु बद्धः वसुदेवः भगवन्तं स्वीकृत्य गोकुलगमनाय उद्दिष्टे सति सर्वाण्यपि तानि पिहितानि द्वाराणि सूर्यस्य उदयात् तमोनाश इव स्वयमेव उद्घाटितानि जातानि। मेघश्च भगवतः अवतारं स्मारं स्मारम् आनन्देन ववर्ष। आदिशेषश्च स्वीयैः फणैः वारिजलं निवारयन् भगवन्तम् अनुजगाम। महत्या वृष्ट्या जातैः गम्भीरैः तोयोघजनितैः फेनिलैः भयानकैः आवर्तनशताकुलैश्च पूरिता यमुना नदी यथा श्रीरामाय समुद्रः मार्गं ददौ तथा वसुदेवाय मार्गं ददौ। ततः वसुदेवः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नन्दगोपं प्राप्य योगमायायाः निद्रायां वर्तमानान् गोपीजनान् अतिक्रम्य यशोदायाः शय्यायां स्वीयं पुत्रं (भगवन्तं) निधाय तस्याः सुतां (योगमायां) स्वीकृत्य पुनः कारागृहम् आगत्य देवक्याः शय्यायां तां न्यस्य पूर्ववत् शृङ्खलां पादयोः आबध्य आस्ते। तत्र च गोकुले यशोदा जातेन श्रमेण योगमायायाः मायया च स्वस्यां जातं शिशुमेव दृष्टवती न तस्य लिङ्गम्। तदर्थः जातमात्रं शिशुम् अबुध्यत, तं शिशुं स्त्री वा पुरुषो वा इति नाबुध्यत इति। एवं श्रीमद्भागवतमहापुराणे श्रीकृष्णावतरण-प्रतिपादनपरः तृतीयाध्यायः समाप्तिमेति।।

(अनुवर्तते.....)

❀ भारतवाणी ❀

विभागं बहवो मोहात्कर्तुमिच्छन्ति नित्यदा।
ततो विभक्ता अन्योन्यं नाद्रियन्तेऽर्थमोहिताः।। १.२५.१२
ततः स्वार्थपरान्मूढान्पृथग्भूतान्स्वकैर्धनैः।
विदित्वा भेदयन्त्येतानमित्रा मित्ररूपिणः।। १.२५.१३
विदित्वा चापरे भिन्नानन्तरेषु पतन्त्यथ।
भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्तते।। १.२५.१४
तस्माच्चैव विभागार्थं न प्रशंसन्ति पण्डिताः।
गुरुशास्त्रे निबद्धानामन्योन्यमभिशंकिनाम्।। १.२५.१५

பலர் அறிவுமயக்கத்தால் பாகப்பிரிவினையை விரும்புகிறார்கள். பிரிந்த பின்னால் செல்வமயக்கத்தால் ஒருவரைக்யொருவர் மதிப்பதில்லை. தன்னலத்தால் பிரிந்த அத்தகையோரை எதிரிகள் நண்பர்களாக நடித்துப் பிரிக்கிறார்கள். பிரிந்தவர்களின் அழிவு விரைவிலேயே நிகழ்கிறது. அதனால்தான் அறிஞர்கள் பிரிவினையைப் போற்றுவதில்லை

CC-0.In Public Domain. Digitized by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

त्रिविधमौषधम् - १७

Sri.S.BALASUBRAMANIAN
Ms. B. RENGA PADMINI
IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

गत मासे वयम् अगदतन्त्रे मन्त्रकृतानि विविधविषोपशमनानि दृष्टवन्तः। इह प्रस्तुतौ वयं रसायनवाजीकरणतन्त्रयोः मन्त्राणां प्रयोगेषु अन्यतमान् पश्यामः।

वाजीकरणशास्त्रे मन्त्रोपयोगः प्रायः न भवति। परन्तु रसायनतन्त्रोक्तविधिषु बहुशः मन्त्राः उक्ता भवन्ति। अतः वयं रसायनतन्त्रे मन्त्राणामुपयोगमादौ पश्यामः। रसायनं नाम किम्? उक्तं हि चरके -

दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः।
प्रभावर्णस्वरौदार्यं देहेन्द्रियबलं परम्।।
वाक्सिद्धिं प्रणतिं कान्तिं लभते ना रसायनात्।
लाभोपायो हि शस्तानां रसादीनां रसायनम्।।

(च.चि.१-१/७,८)

येन कर्मणा नरः दीर्घायुरादिकं लभते तद्रसायनाख्यं भवति। तदिदं रसायनतन्त्रं बहुत्र मन्त्रपूरितं भवति। तत्कथमिति पश्यामः।

द्विविधः रसायनविधिः भवति - वातातपिकः कुटीप्रावेशिकश्च। तत्र कुटीप्रावेशिकरसायनविधौ रसायनकर्मणः पूर्वं मन्त्रैः देवादिपूजा करणीया इति उक्तं भवति।

अथोदगयने शुक्ले तिथिनक्षत्रपूजिते।
मुहूर्तकरणोपेते प्रशस्ते कृतवापनः।।
धृतिस्मृतिबलं कृत्वा श्रद्धधानः समाहितः।
विधूय मानसान् दोषान् मैत्रीं भूतेषु चिन्तयन्।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

देवताः पूजयित्वाग्रे द्विजातींश्च प्रदक्षिणम्।
देवगोब्राह्मणान् कृत्वा ततस्तां प्रविशेत् कुटीम्।।
तस्यां संशोधनैः शुद्धः सुखी जातबलः पुनः।
रसायनं प्रयुञ्जीत.....।। (च.चि.१-१/२१-२३)

कुटीप्रावेशिके रसायनविधौ रसायनपात्रेण मनुष्येण काचित् निर्मितकुटी प्रवेशनीया भवति। रसायनविधिश्चायं सर्वशः अस्यामेव कुट्यां पालनीयो भवति। कुटीप्रवेशनात् प्रागेव कर्तव्याः उपर्युक्ताः विधयः। तत्रैव देवतादीनां पूजादिकर्मसु मन्त्रोपयोगः निदर्शितो भवति।

अन्यच्च नागबला इत्युच्यमानं किञ्चिदौषधीयद्रव्यमुपयुज्य क्रियते अपरः कश्चिद्रसायनविधिः, **नागबलारसायनयोगः** इति। तत्रापि मन्त्रोच्चारणं दर्शितम्। उक्तं हि चरकसंहितायाम् - **.....प्रयतः कृतदेवार्चनः स्वस्ति वाचयित्वा द्विजातीन् चले सुमुहूर्ते नागबलामुद्धरेत्.....।।** (च.चि.१-२/११) तथा केवलामलकरसायनं नाम योगेऽपि मन्त्रप्रयोगः उक्तः।

संवत्सरं पयोवृत्तिर्गवां मध्ये वसेत् सदा।
सावित्रीं मनसा ध्यायन् ब्रह्मचारी यतेन्द्रियः।।
संवत्सरान्ते पौषीं वा माघीं वा फाल्गुनीं तिथीम्।
त्र्यहोपवासी शुक्लस्य प्रविश्यामलकीवनम्।।
बृहत्फलाढ्यमारुह्य द्रुमं शाखागतं फलम्।
गृहीत्वा पाणिना तिष्ठेज्जपन् ब्रह्मामृतागमात्।।
तदा ह्यवश्यममृतं वसत्यामलके क्षणम्।। (च.चि.१)

सावित्रीं मनसा ध्यायन्निति गायत्रीमन्त्रं मनन्निति अर्थः स्वीक्रियते। जपन् ब्रह्म इति ॐकारशब्दं जपन्। तदुच्चारणाय पाणै स्थिते आमलके अमृतम् आगत्य रसायनाय उपकल्पते। (अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शास्त्रं ज्योतिः प्रकाशार्थम् - १५

Ms. DHWANI J.

IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

नमः संस्कृतसेवकेभ्यः! गतवर्षे चेन्नैनगरम् भूयोऽपि जलहीनतया पीडितमभूत्। एवमेव यदा यदा देशेषु जलहीनताख्या समस्योत्पद्यते तदा तदा जनपदानि बहुविचलितानि सन्तः समाधानं पर्येष्टुं इतस्ततः धावन्ति। कुतः इयं अतुलिता भीतिः विचलितचित्तता च जलहीनतया? ज्ञातमेव सर्वैः, **पानीयं प्राणिनां प्राणाः** इति। वैज्ञानिकादिभिः जलसंरक्षणविषये बहुधा अनुसन्धानं कृतं, क्रियमाणं च भवति। तथैव अन्येऽपि बहवो जनाः यथाशक्ति नद्यादिरक्षणार्थं यतमानाः सन्ति। कथमपि मानवजातिरियं जीवनतत्परा सती स्वजीवनार्थम् अतिमहत्वपूर्णं जलरूपं देवमिदम् अवश्यं रक्षयिष्यत्येवेति स्थापयामः। कथमिदं रक्षितं जलं सेव्यं, कथं च न सेव्यमिति सर्वैरपि विचारणीयं, यतो हि अयथावत्प्रयोगेण जलकृताः एव रोगाः समुत्पद्यन्ते प्राणिषु - तदा तु बहुक्लेशं सम्पार्य कृतमिदं जलरक्षणमेव निरर्थकत्वाय कल्पेत। अतश्चात्र बहुमूल्यस्यास्य जलाख्यस्य द्रव्यस्य विषये किञ्चित् विचारयामः। तत्रादौ पदविचारः - **जलति जीवयति लोकान् जलति आच्छादयति भूम्यादीनि इति वा जलम्।** (शब्दकल्पद्रुमः)

अतः जलेनैव जीवस्थितिरिति तत्पदेनैव कथ्यते। सत्यमेव अतिवर्णनास्वपि प्राणक्षयाभिमुखास्ववस्थासु लेशमात्रमपि जलं पुनरुज्जीवनत्वाय कल्पते। न केवलं मनुष्याणां जीवनार्थं जलमनिवार्यं भवति, अपि तु पृथिव्यां जीववृत्तिरेव जलेन निर्मिता भवति - न हि परमरूक्षायां मृदि सस्योत्पत्तिः साध्वी स्यात्।

तदेतत् जलम् आयुर्वेदाचार्यैः बहुधा वर्णितं भवति - क्षेत्रशः उत्पत्तिश्च जलगुणाः कथ्यन्ते, जलस्य बाह्याभ्यन्तरसेवननियमाः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कथ्यन्ते, जलरक्षणविधयः कथ्यन्ते.. एवम्,-आयुर्वेदे जलस्य पृथगेव महत्त्वं भवति। अत्र विविधाः आचार्य्याः भिन्नभिन्नतया जलवर्णनं कुर्वन्ति। उक्तं हि चरकेण - भेत्ता हि भेद्यमन्यथा भिनति इति। आप्तत्वात् सर्वेषामेव वचनं साधु एवेति नास्मत्संशयः कश्चित्। किन्तु विस्तारपरिहारार्थं द्वित्राण्येव मतानि चर्चयामः, तत्रापि सामान्यजीवने बहुप्रासङ्गिकान् विषयान् प्रायेण विस्तारयामः।

जलं तु भुवि विविधं दृश्यते - नदीजलं, सरोजलं, समुद्रजलं, वृष्टिजलमित्यादि। तत्र प्रायेण आचार्यैः वृष्टिजलमेव श्रेष्ठतममुच्यते। तद्धि आयुर्वेदे **गङ्गाम्बु** इत्युच्यते। अस्यां प्रस्तुतौ तावत् प्रास्ताविकरूपेण वृष्टिजलविषये एव विचारयामः। तत्रायं श्लोकः -

जीवनं तर्पणं हृद्यं ह्लादि बुद्धिप्रबोधनम्।
तन्वव्यक्तरसं मृष्टं शीतं लघ्वमृतोपमम्।।
गङ्गाम्बु नभसो भ्रष्टं स्पृष्टं त्वर्केन्दुमारुतैः।

(अष्टाङ्गहृदयम् - सूत्रस्थानम् - ५/१-१.५)

यज्जलं नभसो भ्रष्टम् आकाशात् पतितं भवति, अर्केन्दुमारुतैः सूर्यचन्द्रवायुभिः स्पृष्टं च भवति तज्जलं गङ्गाम्बुसंज्ञकं भवति। तच्च जलं जीवयति तर्पयति च प्राणिनः, हृदे हितं भवति, मनः प्रसादयति, बुद्धिं चोत्तेजयति। तच्च तनु भवति, न पुनर्घनम्। तस्य रसः अव्यक्तः भवति - मधुरः लवणः अम्लः इति व्यक्तो रसस्तस्य नास्तीति यावत्। मृष्टमिति शुद्धम्। वीर्येण शीतम्। लघु, न तु गुरु, सुखेन जीर्यते इति। अमृतोपमम् अमृतवत् इति। स्पष्टमेतत् सर्वम् - किन्तु, आधुनिकैः एसिड् रैन् (Acid rain) इति वदन्ति। तत्तु वृष्टिजलं सदपि अशुद्धं रोगोत्पादकं च भवति खलु! - किन्तर्हि वृष्टिजलस्य श्रेष्ठताविषये आयुर्वेदे यत्प्रोक्तं तदसिद्धीकृतं वेति चेत् - न जातु। आयुर्वेदस्तु खलु शाश्वतः! अस्माकं पूर्वाचार्य्यैः एतदपि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दुष्टवृष्टिजलं वर्णितमेव, उक्तमेवाग्रे - **हिताहितत्वे तद्भूयो देशकालावपेक्षते** इति। वायुप्रदुष्टिस्तु वाहनैः यन्त्रशालादिभिर्वा बहुधा क्रियते। सा चापि अस्यां पङ्क्त्यां देश इति पदे अन्तर्गता स्यात्। यद्यपि देशकालाविति कथने स्थाननक्षत्रादिबहवो विषयाः गुप्ताः स्युः, तथापि सुलभग्रहणार्थमेवंविधानि उदाहरणानि स्वीक्रियन्ते।

अस्तु, वृष्टिर्भवति - जलं तु शुद्धमेव भाति। किन्तु तज्जलं शुद्धं गङ्गाम्बु भवति वा उत देशकालादिभिः प्रदुष्टं भवति वा इति कथं ज्ञायेत? तदर्थोऽप्युपायः उक्तः आचार्येण - **येनाभिवृष्टममलं शाल्यन्नं राजतस्थितम्। अक्लिन्नविवर्णं च तत्पेयं गाङ्गम्..।।** (अष्टाङ्गहृदयम्)

रजतपात्रे शाल्यन्नं स्थापयित्वा तस्योपरि वृष्टेः गृहीतं जलं पातयामश्चेत् तदन्नम् अक्लिन्नं क्लेदरहितम् अविवर्णं च भवेच्चेत् तज्जलं शुद्धमिति लक्ष्यम्। प्रयोगशालासु परिश्रमापेक्षिताः उपायाः एव सर्वत्र श्रेष्ठतराः इति नास्ति खलु!

अस्यापि शुद्धस्य वृष्टिजलस्य सेवने क्वचित् निषेधः कृतः। तत् कदा इति चेत् -

अनार्तवं च यद्दिव्यमार्तवं प्रथमं च यत्।
लूतादिजन्तुविण्मूत्रविषसंश्लेषदूषितम्।।
तत्कुर्यात्स्नानपानाभ्यां तृष्णानाहोदरज्वरान्।
कासाग्निसादाभिष्यन्दकण्डूगण्डादिकानपि।।

(अष्टाङ्गहृदयम्)

सुशुद्धमपि वृष्ट्यम्बु अकालवृष्टेः पतितम् अशुद्धं परिणमते। तत्र ऋतौ भवम् आर्तवं, न आर्तवं अनार्तवम्। यज्जलं वर्षर्त्वितरर्तूद्भवं भवति तदशुद्धं भवतीत्युच्यते। वर्षर्तोः प्राक्खलु ग्रीष्मः - तदा तु वायोः रौक्ष्यमधिकं भवति। अतः वायुः रजोजुष्टं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भवति, लूताद्याढ्यश्च भवति। अतः पश्चात् वर्षर्तोः प्रथमा वृष्टिः अमुम् अशुद्धं वायुं शोधयन्ती अधः पतति। अतः तज्जलं न स्पृश्यम्। तथैव अनार्तवमपि वृष्टिजलम्। तस्य सेवनात् तृष्णादयः उपद्रवाः जायन्ते इत्युच्यते। तथा च -

न पिबेत्पङ्कशैवालतृणपर्णाविलास्तृतम्।
सूर्येन्दुपवनादृष्टमभिवृष्टं घनं गुरु।।

आर्तवम् अप्रथममपि वृष्टिजलं यदा पङ्कादिजुष्टं सञ्जायेत तदा तदसेव्यमित्युच्यते। तथैव सूर्येन्दुपवनादृष्टमभिवृष्टमिति वर्षपतितमपि जलं यदा सूर्यचन्द्रवायुभिः गुप्तं भवति अधो भूमेः अथवा खाते तदा तज्जलमपि अशुद्धं सञ्जायते इति। घनं गुरु च अप्राकृतिकं दिव्योदकमेव सङ्केतयति यथाऽस्माभिः एसिड्रैनिति प्रसङ्गे पूर्वं चर्चितम्। यदि पुनः एवंविधमशुद्धं जलं सेव्येत तर्हि षट् दोषाः आपद्यन्ते इति सुश्रुताचार्य्येण लिख्यते -

१. स्पर्शदोषः - खरता, पैच्छिल्यम्, औष्ण्यं, दन्तग्राहिता
२. रूपदोषः - पङ्कसिकताशैवालबहुवर्णता
३. रसदोषः - व्यक्तरसता
४. गन्धदोषः - अनिष्टगन्धता
५. वीर्यदोषः - यदुपयुक्तं तृष्णागौरवशूलकफप्रसेकानापादयति
६. विपाकदोषः - यदुपयुक्तं चिराद्विपच्यते विष्टम्भयति वा

किन्तर्हि इत्थं जुष्टं जलं वृथा एव वेति चेन्न सर्वथा। एषां व्यापन्नानां जलानां शुद्धये बहवो उपायाः सन्ति। तान् चोपायान् अग्रिमे मासि चर्चयिष्यामः।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

को नाम संस्कारः? எம்ஸ்காரம் என்றால் என்ன?

(श्रीमहास्वामिनां वचःसमुद्धरणपूर्वकम्)

Dr. S. THIAGARAJAN
Department of Oriental Studies & Research,
SASTRA - Deemed to be Unviersity, Thanjavur

कर्म इत्युक्ते किम्? यत् क्रियते तत् कर्म। एकं वस्त्रं निर्मातुं कियन्ति कर्माणि करणीयानि भवन्ति! कार्पासं संचित्य, बीजानि पृथक्कृत्वा तन्तून् निर्माय, यन्त्रे सीवयित्वा, वर्णाः संयोज्य - इत्येवं कियन्ति कर्माणि करणीयानि भवन्ति? तथैव अनेकानि कार्याणि कृत्वा एकः (जीवः) आत्मवित् भवति। गुणेन शरीरेण चोभयेन परस्परं परिशुद्धं कृत्वा एकः आत्मवित् भवति। एतादृशकर्मणः एव संस्कारः इति नाम। कस्यचन पदार्थस्य दोषं यो निवारयति, यश्च तस्मिन् पदार्थे गुणानारोपयति स एव संस्कारः इति ज्ञायते। यथा - केशसंस्कारः इत्युक्ते क्षौरकरणम्, मलमशकादीन् निष्काश्य तैलाभ्यञ्जनमित्यादि। तथा जीवात्मनः दोषाः भवन्ति। दोषान् निवार्य गुणान् प्रपूरयेत्। कङ्कतेन केशमलङ्कृत्य तैलाभ्यञ्जनमिव भवति संस्कारः। कृषिक्षेत्रेषु केचन संस्काराः क्रियन्ते। आदौ क्षेत्रस्य शुष्कीकरणम्, ततः क्षेत्रसंकर्षणम्, ततः बीजवपनम्, अङ्कुरपालनम्, अपतृणनिष्काशनम्, जलसेचनम्, जलाधिक्ये जलपन्थापरिमार्जनम्, फलिते च सस्यसंपादनम्, क्षेत्रकलेषु सस्याघातः, तुषविमोकः इत्येवं कृत्वा ततः व्रीहीन् एकत्रीकृत्य कोष्ठः निर्मातव्यः। ततः ते व्रीहयः बहुकालं सुसंस्कृत्य अनन्तरमेव तान् उपयोक्तुं शक्यते। एतावन्ति कर्माणि सन्ति। कार्पासेन तन्तुं कृत्वा वस्त्रं निर्मातव्यं चेत् बहूनि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कार्याणि सन्ति। कार्पासयन्त्रशालायां कियन्ति कार्याणि क्रियन्ते? तन्तूनां जटिलतां विना वायनं कर्तुं कियती जागरूकता अपेक्षिताऽस्माकम्? अस्मज्जीवात्मा इन्द्रियचलनैः जटिलः भवति। तां जटिलतामपसार्य सर्वदा आनन्दमयेन भाव्यम्। तथा कर्तव्ये बहूनि अवरोधकानि समायान्ति। अधुना तावत् यदा कदाप्येव आनन्दः अनुभूयते। बहुविधानि दुःखानि, अनेके क्लेशाः भवन्ति चेदपि कश्चिद् आनन्दः भवति खलु, अयमानन्दः सर्वदा यथा भवेत्तथा करणीयम्। तदर्थं जीवात्मानं ब्रह्मलोकं प्रति प्रापयेत्। तत्र भगवत्सन्निधाने आत्मानं प्रापयामश्चेत् ततः दुःखमेव न भवति। प्रलयस्यानन्तरम् ऐक्यं भविष्यति। अतः तत्र जीवात्मानं प्रापयितुं सन्नद्धाः भूयास्म। तदर्थमेव चत्वारिंशत् संस्कारान् अष्टावात्मगुणान् च ऋषयः उपादिशन्।।

आत्मगुणाः, आत्मनः संस्कारैः शुद्धीकरणमित्यादिके श्रूयमाणे आत्मा तावत्, द्वैतिभिः वक्ष्यमाणवत् अर्थात् परमात्मनः भिन्नवज्ज्ञायमानः जीवात्मा एव। वस्तुतः एक एव आत्मा, जीवात्मा परमात्मा इति भेद एव नास्ति। अयमात्मा नित्यशुद्धः। अतः तं संस्कारैः शुद्धीक्रियते इति यद्वदामः तन्न साधु। तन्निर्गुणं वस्तु। अतः आत्मगुणः इत्यपि न साधु। तथापि तन्निर्गुणं वस्तु मायादिभिः कैश्चिदपि हेतुभिः अस्मदादिरूपं सत्, अस्मभ्यं **तत् एव वयम्** इति ईषदपि बोधः यथा न भवति तथा व्यवहारे तिष्ठति खलु?

इत्थं द्वैतरूपेण भेददशायां विद्यमानं जीव एव अत्र आत्मा इत्युक्तोस्ति। अयमशुद्धः एव। अतः संस्कारैः अस्य शुद्धीकरणम्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आवश्यकमस्ति। अयं दुर्गुणयुक्तः। अतः अष्टौ आत्मगुणान् अभ्यस्य अमुं सद्गुणयुक्तत्वेन करणीयम्। ततः परं संस्कारादिकार्याणि अपगच्छन्ति, उत्कृष्टाः सत्त्वादयः गुणाः अपि अपगच्छन्ति। जीवात्मपरमात्मभेदरहितः अखण्डैकात्मानुभवः तदानीमेव सिद्ध्यति। तदनुभवसिद्धये एव इदानीं कार्याणि (संस्काराः), गुणाः च अपेक्षिताः। अस्मल्लक्ष्यभूतानां पुराणपुरुषाणामुत्तमगुणान् याथातथ्यं स्वीकृत्य अनुसरामः इति चेत् तन्न शक्यते। यतः आशापाशाः, द्वेषाः, भयं, मनसश्चेतरे कृत्रिमाः इति सर्वाण्यपि प्रतिबन्धकानि भवन्ति। अस्मभ्यं बहूनि कर्माणि दत्त्वा तेन समम् इत्थमेव उपवेशनीयम्, इत्थमेव वस्त्रं धरणीयमस्माभिरित्यादिकैः नियमैः मनसः नियन्त्रणं करणीयम्। तदा सत्येव मनः अहङ्कारहीनम् सत् चञ्चलहीनं भवति। दम्भाहङ्कारयोः क्षये एव आशाद्वेषभयदुःखादीन् संयम्य उत्तमगुणेभ्यः च्युतो न भवति। संस्काराः सद्गुणाश्च अन्योन्यं सम्मिल्य आगच्छन्ति। आदर्शपुरुषाणां गुणान् श्रुत्वा अस्माभिरपि तथैव भाव्यम् इति प्राप्तुमीहमानान् गुणान् वास्तविके प्राप्तुं संस्काराः साहाय्यं कुर्वन्ति।।

(अनुवर्तते.....)

❀ भारतवाणी ❀

सम्यक्सद्धर्ममूला हि व्यसने शान्तिरुत्तमा।
अधर्मोत्तरता नाम कृत्स्नं व्यापादयेज्जगत्।। १.३३.२०

துன்பம் நேரும்போது அறவழியிலான நிவாரணமே சிறந்தது. அறமற்ற வழியை பின்பற்றினால் உலகமே அழியும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

योगम् अवगच्छामः

Sri. LAKSHIMI NARASIMHAN
Assistant Professor, Department of Sanskrit,
D.G. Vaishnav College, Chennai

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।

विश्वप्रसिद्धयोगशास्त्रस्य प्रचारः अधुना अनेकैः प्रकारैः समग्रभारतदेशे तथा विश्वे च क्रियमाणमस्ति, विशिष्य प्रधानमन्त्रिणः योगान्दोलनानन्तरम्। भारतदेशस्य प्रति प्रान्ते अनेकानि प्रसिद्धयोगकेन्द्राणि, विद्यालयाश्च तदा तदा कार्यक्रमान् सञ्चाल्य प्रोत्साहयन्ति अनेकान्। परं अस्माकं पूर्वजैः ऋषिभिः प्रदर्शितस्य योगमार्गस्य वास्तविकं लक्ष्यं जनाः किं संयक् अवगतवन्तः इति प्रश्ने उदिते, अधिकैः न इत्येव वक्तव्यं भवति। कारणं योगस्य प्रचारः अत्यधिकतया बाह्येन्द्रियसंरक्षणं केन्द्रीकृत्यैव भवतीत्यतः। मनसः संयग्निर्वहणमेव इन्द्रियनिर्वहणसहकारि।

लोके तावत् अधिकानां मनसि योग इत्युक्ते आसनानां चित्राणि एव मनसि आगच्छन्ति। इतरेषां मनसि तु रोगदूरीकरणोपयोगी इति। तादृशः प्रचारः कृतोऽस्ति प्रचारकैः। तादृशप्रचारं कुर्वाणाः योगं इतरव्यायामप्रकारमिव स्वाभिलाषानुगुणं परिवर्त्य पाठयन्तः, कथञ्चित् जनान् स्ववशीकर्तुमेव यतमानाः सन्ति। समस्यानिवारणार्थम् आगच्छतामज्ञता अपि अत्र ध्येया। योगस्य कुतश्चित् कथञ्चिदध्ययनं हानिकरमेव।

योगस्य पाठनं कथं आरम्भस्तरे विद्यालयेषु भवतीति पश्यामः। विद्यालयेषु योगः अनिवार्यतया पाठ्यते चेदपि छात्रेभ्यः व्यायामप्रकारेणैव पाठ्यते। **योगः कर्मसु कौशलं - तं विद्यात् दुःखसंयोगवियोगं योगसंज्ञिकं,** इति गीतोक्तरीत्या योगस्य वास्तविकलाभः कथं छात्रान् प्रति गच्छेदिति संयग्विचार्य पाठ्यांशान् यदा स्थापयामः, तदर्थं उचितशिक्षणं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दत्वा उचितान् शिक्षकान् च यदा चिनुमः, तदा एव छात्राः बाल्यावस्थायां जीवनस्य आधारांशान् संयक् ज्ञात्वा उचितान् यम-नियम-आसन-प्राणायामादीन् अभ्यस्य, स्वाध्यायं कर्तुं समर्थाः भूत्वा स्वगृहे-विद्यालये तथा समाजे च आत्मनः कौशलं प्रकटयन्तः, भाविकाले च अभ्यासवैराग्याणां प्रभावेण उत्तमनागरिकाः भूत्वा आत्मविकासं, तथा देशस्य विकासं च दातुमर्हन्ति।

योगाध्ययनं कथं भवेत्

योगस्य सामान्यपाठनं विहाय गुरुकुलाध्ययनमिव आचार्यमधीत्य कुर्मः चेदेव वरम्। यतः सामूहिकवर्गेषु व्यक्तिगतसमस्यानां निवारणं प्राप्तुं अवकाशः लभ्यते चेत् वरम्। शिक्षकस्य स्थानमत्र मुख्यमस्ति। गुरुकुलेषु क्रमशः अधीत्य, योगस्य लक्ष्यं स्वजीवने ये स्वयम् अनुभवन्ति, ते एव इदानीमपि योगं संयक् रक्षन्ति, पूर्वाचार्यानुगुणं पाठयन्ति।

अधिकाः जनाः लज्जया न यतन्ते आत्मनः दौर्बल्यस्य दूरीकरणार्थम्। स्वस्य दौर्बल्यस्य अङ्गीकरणार्थमेव आवश्यकं धैर्यं प्रथमतः। शरीरस्य तथा मनसः दौर्बल्यम् कियदस्ति, तस्य अङ्गीकारः, स्वस्य समस्यावगमनं, तन्निवारणार्थं प्रयत्नः इत्यंशाः अत्र मुख्यं स्थानं वहति। अधिकाधिकम् आत्मप्रयत्नेनैव मानवः उचितं शिक्षकं प्राप्य अभ्यासांश्च कृत्वा शनैः शनैः निवारयेत्।

महाभारते युद्धं कर्तुं आरम्भतः यतमानः अर्जुनः बान्धवान् आचार्यान् अन्यांश्च दृष्ट्वा न काङ्क्षे विजयं कृष्ण, किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा? इति बहुधा प्रलपन् अन्ते गाण्डीवं त्यक्तुमपि उद्युक्तः यदा भवति तदा अर्जुनस्य मनसः दौर्बल्यस्थितिं ज्ञात्वा भगवान् श्रीकृष्णः तस्य आचार्यस्थानं स्वयं तत्समये वोढ्वा गीतोपदेशम् अकरोत्। अहो भाग्यं अर्जुनस्य यत् साक्षात् भगवानेव तस्मै योगमार्गमुपदिष्टवान् !

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अध्ययनसमाप्त्यनन्तरं (शिक्षाकेन्द्रात्) समाजे यदा मानवः प्रविशति, तदा महान् भेदः जायते तस्य आहार-व्यवहारादिषु। कारणान्यनेकानि सन्ति निर्देष्टुम्। स्वतन्त्रजीवनमेकत्र, इतरत्र तावत् उद्योगनिर्बन्धाः इत्येतादृशानि कारणरूपेण प्रोच्यन्ते अधिकैः। रोगं विहाय कति जना स्वस्थाः सामान्यजीवनं जीवन्ति ? चिन्तनीयः अयमंशः।

ग्रामेषु प्राकृतिकजीवनं यापयतां स्तरः सामान्यतया भिन्नः। परं नगरेषु निवसतां, अप्राकृतिकजीवनं यापयतां व्यायामादिषु अप्रसक्तानां शरीरे मनसि च दरीदृश्यमानरोगाः अत्यधिकाः जाता इदानीम्। दुःखदौर्मनस्याङ्गमेजत्वश्वासप्रश्वासा विक्षेपसहभुवः इति महर्षिणा सर्वे पूर्वं निर्दिष्टा रोगा एव इदानीं भिन्ननाम्ना व्यवह्रियन्ते। एतेषां निवारणं कुर्मः इति कति जनाः अस्वस्थान् लुण्ठन्तीति वक्तुमेव न शक्यते।

रोगस्य अवगमनपर्यन्तं न ज्ञायते मानवेन किं जायमानमस्ति इति। परं औषधार्थं व्ययः, तेषां दुष्प्रभावः इत्येतैः पीडिताः कथञ्चित् योगं प्रति आगच्छन्ति। आगमनपूर्वं किञ्चित् स्वाध्यायं कृत्वा आगच्छन्ति चेत् लाभाय। केवलम् अभ्यासेन सर्वं साध्यं वा इत्युक्ते न। आहार-व्यवहार- जीवनशैल्यादिषु परिवर्तनम् मानवः अशक्तश्चेत् किमपि कर्तुं न शक्यते। अत एव उक्तं गीतायां-

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।।

युक्त इति एकः अंशः पर्याप्तः सर्वेषु जीवनोपयोगिविषयेषु। पतञ्जलिमहर्षिणा अष्टाङ्गयोगः तु निर्धारित एव। अथ योगानुशासनं, योगश्चित्तवृत्तिनिरोधः इति पातञ्जलयोगसूत्रस्य समाधिपादस्य प्रथमं सूत्रद्वयं पश्यामः चेत्, योगः = अनुशासनं, चित्तवृत्तीनां निरोध एव योगः, **अभ्यासवैराग्याभ्यां तन्निरोध** इति आरम्भे एव पतञ्जलिमहर्षिः साधकाय समुचितं सोपानं प्रदर्शयति योगमार्गे प्रवेष्टुम् राजयोगपद्धत्या। अध्येतुः मनसि दाहकल्पनं,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तदर्थं अवकाशकल्पनं च अध्यापकस्य मुख्यं कर्तव्यं भवति।

अष्टाङ्गयोगसोपाने प्रथमं अहिंसा, सत्यं, अस्तेयं, ब्रह्मचर्यं, अपरिग्रहः- इति पञ्चनां यमानां, शौचः, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम् इति पञ्चानां नियमानां अवगमनं, आवश्यकतां च संयक् प्रतिपादयति महर्षिः पतञ्जलिः **अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः** इत्यादिभिः सूत्रैः। आसनप्राणायामैस्सह क्रमशः एतानपि अभ्यसामः चेदेव आबाल्यात् गुणतः वयं कुत्र स्मः, स्वस्मिन् रजो गुणस्य प्रभावः अधिकः वा उत तमो गुणस्य प्रभावः इत्यात्मावलोचन-प्रक्रियया जीवनलक्ष्यं दृढतया साधयितुं , तन्मार्गे संयक् गन्तुं च प्रभवामः। अत्र तावत् देहावसानं यावत् इन्द्रियसंरक्षणमावश्यकम्। तादृशमुख्यभूतामिन्द्रियाणां स्थितिः स्थिरा वा अथवा कीदृशी इति वास्तविकमवगमनं, तेषां लक्ष्योपयोगार्थं संरक्षणं तथा वर्धनं कथमिति प्रथमं ज्ञानम् आवश्यकम्। तदनन्तरं प्राणायामप्रत्याहाराभ्यां मनसः निर्वहणं कर्तुं शक्यते।

सत्व-रजो-तमोगुणानां प्रभावः साधकेषु स्थित्यनुगुणं वर्तत एव। उदाहरणतया रजोगुणप्रभावः यस्मिन् अधिकः वर्तते, सः शरीरे, प्राणे च स्थिरताम् असम्पाद्य, (पूर्वसन्नाहं त्यक्त्वा) प्रत्याहार-धाराणाभ्यासान् त्यक्त्वा, साक्षात् ध्यानम् अभ्यसुतुमारभते चेत् समस्याः एव भविष्यन्ति। मनसः चाञ्चल्यात्, प्राणशक्तेः अकारणव्ययात् च स मानवः न कदापि शान्तस्सन् व्यवहर्तुं प्रभवेत्। अन्यत्र तमोगुणप्रधानः साधकः ध्यानम् अभ्यसति चेत्, निद्रादिभिः समस्याभिः निद्रावशः भवति। अत एव हठयोगस्य अभ्यासः आवश्यकः तमोगुणभूयिष्ठाय मानवाय।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आदिशङ्करस्यानुभूत्यां मातृपितृगुरुदेवाः

Dr. V. RAMAKALYANI
The K.S.R.I., Chennai - 4

आधुनिककाले वयं पश्यामः यत् पुत्राः स्वमातापितरौ वृद्धसंरक्षणशालासु त्यक्तवन्तः सन्ति। गुरुं प्रत्यादरं युवकयुवतयः न प्रकटयन्ति। जनानां मध्ये भक्तिभावः अपि मलिनः भवति। भक्तिः व्यापाररीत्या **भवान् इदं कार्यं मह्यं करोतु; अहं भवते नारिकेलफलानि दास्यामि** इति भावेनैव भवति। आदिशङ्करस्य मातृ-पितृ-गुरु-देवान् प्रत्युक्तसंदेशाः ईदृशजनानां मध्ये किञ्चित् शुभपरिवर्तनमानेतुं शक्नुवन्ति इत्याशया इदं पत्रं लिख्यते।

भारतीयसंस्कृतिः मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, इत्युक्तिषु लब्धप्रतिष्ठः अस्ति। आचार्यः भगवान् आदिशङ्करः कथमेतानीक्षते इति भगवतः दृष्ट्या, कैश्चन उदाहरणश्लोकैः, अत्र विचार्यते।

माता

प्रश्नोत्तरमालिकायां (श्लो.६२) प्रत्यक्षदेवता का ? इति प्रश्नस्य माता इति उत्तरमाचार्यः निर्दिशति। केरळे वर्तमान-कालडिप्रदेशे शङ्करस्य जन्म अभवत्। तस्य माता एव तमपोषयत् । एकदा शङ्करेण ईश्वरकृपया, मातुः स्नानार्थं पूर्णानद्येव गृहस्यान्तिकमानीता। एतया लीलया तस्य मातरं प्रति महानादरः आसीत् इति ज्ञायते। सः सन्यासस्वीकरणसमये, मातुः देहान्तकाले आगत्य तस्याः संस्कारान् कर्तुं मात्रे वचनं दत्तवान्। तथैवाकरोच्च। तत्समये रचितं मातृकापञ्चकम् (मा.प) सर्वमातृभ्यः गौरवप्रदायकं भवति। मात्रा पुत्राय प्रसूतिसमये बाल्यावस्थायां च यद्यत् कृतं तत्समं किमपि आयुःपर्यन्तं पुत्रेण कर्तुं न

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शक्यते इत्याचार्यः मातृकापञ्चकस्य प्रथमश्लोकेऽस्मिन् दृढीकरोति-

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी।
एकस्यापि न गर्भभारभरणक्लेशस्य यस्य क्षमः
दातुं निष्कृतिमुन्नतोऽपि तनयः तस्यै जनन्यै नमः ।।

एतदर्थमेव यद्यद्वै तत्र नितरां दुःखं व्यथयति, केन वक्तुं शक्यते? मेऽपराधः क्षन्तव्यः शिव! शिव! इति आचार्यः शिवापराधक्षमापणस्तोत्रे प्रथमश्लोके क्षमां प्रार्थयति।

माता पुत्रे पुत्र्यां च मम मुक्तामणिः, नयनं इत्यादि बहुभिः मधुरवचनैः स्निह्यति। प्रत्युपकाररूपेण तनयः अन्तिमयात्रापूर्वं शुष्कं तण्डुलमेव दातुं शक्नोति इति श्रीशङ्करवचनम् (मा.प. ४):

मुक्तामणिस्त्वं नयनं ममेति राजेति जीवेति चिरं सुत त्वम्।
इत्युक्तवत्यास्तव वाचि मातः ददाम्यहं तण्डुलमेव शुष्कम् ।।

प्रसूतिकाले वेदनामसह्यमाना माता अम्ब! तात! शिव! इति अनेकवचनैः आमनस्यं दुःखं प्रकटीकरोति। प्रतीकाररूपेण पुत्रः मातुः अन्तिमकाले कृष्ण, गोविन्द इत्यादि प्रार्थयित्वा तस्यै अञ्जलिमेव कर्तुमर्हति इत्याचार्यः पुत्रधर्मं सूचयति (मा.प.५):

अम्बेति तातेति शिवेति तस्मिन् प्रसूतिकाले यदवोच उच्चैः।
कृष्णेति गोविन्देति हरे मुकुन्देत्यहो जनन्यै रचितोऽयमञ्जलिः।।

मातृकृतोपकारस्य प्रतीकारं कोऽपि कर्तुं न शक्नोति। इत्थम् आचार्यः मात्रे उन्नतस्थानं निर्दिशति। माता पुत्राय यत् करोति तत् केनापि अन्येन कर्तुं न शक्यते। अतः पुत्रः मातृणं निर्वर्तयितुं न शक्नोति। ये सुताः इदं पञ्चकम् अर्थं ज्ञात्वा पठन्ति, ते मातरं स्नेहेन परिपालयिष्यन्ति, वृद्धरक्षणशालां प्रति न प्रेषयन्ति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पिता

शङ्करस्य बाल्ये वयसि एव तस्य पितुः शिवलोकप्राप्तिरभवत् इत्यतः सः पित्रा सह न बहुकालं यापितवान्। शङ्करः पितरं प्रति दीर्घस्तोत्राणि न लिखितवान् इति प्रतिभाति। सः परमेश्वरं पितरं मन्यते। अर्धनारीश्वरस्तोत्रे तेन लिखितम् **जगज्जनन्यै जगदेकपित्रे नमः शिवायै च नमः शिवाय।**

अन्नपूर्णाष्टके अपि माता च पार्वती देवी पिता देवो महेश्वरः इति तेन चिन्तितम्। प्रश्नोत्तरमालिकायां (श्लो.६२) पूज्यो गुरुश्च कः? इति प्रश्नस्य तातः इत्युत्तरं दत्त्वा पितुः पावनस्थानं निर्दिशति। पितरि गुरौ इव आचरणीयमिति संदेशमपि ददाति। पितृवात्सल्यं कथं भवति इति सुब्रह्मण्यभुजङ्गे आचार्येण विवृतम् (सु.भु. १७)

इहायाहि वत्सेति हस्तान्प्रसार्याह्वयत्यादराच्छङ्करे मातुरङ्कात्।
समुत्पत्य तातं श्रयन्तं कुमारं हराश्लिष्टगात्रं भजे बालमूर्तिम्।।

अत्र वर्णयति- कुमारः मातुरङ्के उपविशन्नस्ति। पिता अन्तरागच्छति। पिता बहुवात्सल्येन हस्तान् प्रसार्य पुत्रमाह्वयति एहि वत्स, एहि वत्स इति। कुमारोऽपि उत्पत्य पितरं प्रति धावति। पिता अपि प्रियपुत्रं गात्रेण गात्रं गाढमालिङ्गति। अनेन पितुः पुत्रं प्रति प्रीतिं दर्शयति। पितृभावं दर्शयन्, इदमपि श्रीशङ्करेण समुदितम् (सु.भु.३०):

जनित्री पिता च स्वपुत्रापराधं सहेते न किं देवसेनाधिनाथ।
अहं चाति बालो भवान् लोकतातः क्षमस्वापराधं समस्तं महेश।।

पितरौ पुत्रस्य अपराधं सहेते। अतः आचार्यः प्रार्थयति- अहं भवतः पुत्रः, पिता भवान्, अतः मम अपराधं क्षमाकरोतु इति। एवं वात्सल्यसहितः पिता पूज्यः गुरुः अपि भवति।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बालकथा - ६

(वृद्धपितामही चिरन्तनीति नामधेयवती बालान् कथयति)

(चित्रम् - सु.श्री.इन्दु, Intern, SJS Ayurveda College, Chennai)

बालाः श्रद्धा विश्वासश्च सकलमपि अर्थं साधयतः। उभौ एव धर्मस्य स्तम्भौ भवतः। श्रद्धा विश्वासश्च यस्य भवतः सः सर्वाणि पापानि तरति। अत्रैकां कथां कथयामि, सावधानाः श्रुण्वन्तु।

काशीनगरे सर्वपावनी गङ्गा नदी प्रवहति खलु। तस्यां स्नानेन सकलानि अपि पापानि नश्यन्ति इति पुराणानि मुक्तकण्ठं कथयन्ति। किन्तु सर्वेषामपि भवति वा इति प्रश्नः उदीयात्। अमुं प्रश्नं पार्वती परमेश्वरम् एकदा अपृच्छत्। हसन् परमेश्वरः न सर्वेषां भवति किन्तु ये श्रद्धया विश्वासेन च स्नान्ति तेषामेव भविष्यतीति अवोचत्। पार्वती विस्मिता सती पुनः कथमिति पप्रच्छ। परमेश्वरः साक्षाद् दर्शयामीति उवाच।

उभौ अपि वृद्धरूपिणौ गङ्गायाः तीरं प्राप्नुताम्। शिवः गङ्गायां पतित इव अनटत्। पार्वती वृद्धवेषधारिणी अरुदत्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मम पतिं पाहि पाहि इति उच्चैः आक्रोशत्। तदा बहवः जनाः तस्य रक्षणाय समागच्छन्। तदा वृद्धा सर्वानपि दृष्ट्वा यः एकम् अपि पापं नाकरोत् स एव मम पतिं स्प्रष्टुम् अर्हति। अतः पापहीनाः कृपया रक्षन्तु। अन्यः मा स्म स्प्राक्षीत् इति अवोचत्। सर्वेपि आत्मनः पापं पूर्वकृतं स्मरन्तः न्यवर्तन्त। एकः अपि तस्य वृद्धस्य रक्षणाय न पुरतः आगच्छत्।

तन्मध्ये एकः वेगेन आगच्छन् गङ्गायां पतित्वा वृद्धं समरक्षत्। तीरम् आनीय समस्थापयत्। पार्वती विस्मिता सती तं किं त्वं पापं न अकार्षीः इति पप्रच्छ। सः, अम्ब, अहं प्रकृत्या चोरः, सकलविधमपि पापं समाचरम् इति प्रत्यवदत्। पुनः विस्मिता पार्वती तर्हि कथं मम भर्तारं अस्पृशः, मम वचनं कथम् अत्यजः इति पप्रच्छ। चोरः अवदत्, अम्ब अहम् एकस्य उपन्यासकस्य वचनम् अश्रुणवम्। सः अवोचत् - गङ्गायां स्नानेन सर्वमपि पापं नश्यति इति। तर्हि यदा अहं गङ्गायां अपतम् तदानीमेव मम पापानि निरगच्छन्। पापरहितः सन् अहं वृद्धम् अतारयम् इति अकथयत्।

तत् श्रुत्वा हृष्टौ पार्वतीपरमेश्वरौ निजरूपं प्रकटयामासतुः। श्रद्धया विश्वासेन च तस्य चोरस्य पापानि निरगच्छन्। सः स्वर्गं प्राप्नोत्।

बालाः अपि, अश्रुण्वन् कथाम् एनाम्। श्रद्धाविश्वासौ यदि भवतः तर्हि धर्मः सिद्ध्यति। अतः धार्मिकेषु विषयेषु श्रद्धया विश्वासेन च प्रवर्तनं कुर्वन्तु। तेन धार्मिकफलानि लभन्ताम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

INTRODUCTION TO HINDU CONCEPT OF LAW

Sri. T.S. SUDARSHAN
Research Scholar, Dept. of Sanskrit & IC, SCSVMV

This ascendency of law is reminiscent of the modern conception of the rule of law envisaged in the Constitution of India and adopted symbolically in the dharma chakra which adorns the Indian flag and is part of the State emblem. As dharma is that which has to be done to secure good or happiness a body of systematized knowledge was developed about it. These were known as shastras and lay down means to attain a particular end . When the ends likely to be pursued by men came to be classified into dharma, artha , kama,and moksha, these works were grouped into Dharma Shastras, Artha Shastra, Kama Shastras and Moksha Shastras. The Dharma Shastras thus deal with the religious and moral law, the duties of castes and kings as well as civil and criminal law. The Ancient Law as administered today is only a part of the Vyavahara law of the Smritis (i.e. the law, the breach of which results in judicial proceedings) and the Vyavahara law in its turn is only a fraction of the rules contained in the Smritis dealing with a variety of subjects constituting the religious and the moral observances and expiations (achara and prayachilta).

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीमद्वेदान्तरामानुजमहादेशिकवैभवमालिका

Dr.V.SOWMYANARAYANAN,
Assistant Professor & Head, Dept., of Sanskrit,
D.G.Vaishnav College, Arumbakkam, Chennai 600 106.

कुम्भघोणपुरशब्दपूर्वकं श्रीमदाण्डवनितीरितं जनैः।
काष्ठकाञ्चनसुपादुकाधरं वेदमौलियतिराजमाश्रये।। १ रथोद्धता

चन्द्रप्रभाभिः शतवार्षिकाभिः
पूतोऽस्मदाचार्यसुतल्लजोऽसौ।
शिष्याश्रयेण श्रितरक्षणेन
नारायणोऽयं नहि मेऽस्ति शङ्का।। २ इन्द्रवज्रा

सदाश्रयत्वात् सकलात्मकत्वात्
श्रियाभिजुष्टात् श्रुतिभूषणत्वात्।
हंसात्मकत्वात् हसिताननत्वात्
नारायणाऽसौ नहि मेऽस्ति शङ्का।। ३ उपजातिः

अपर्याप्तामृतस्यायं समाराधनतत्परः।
सपर्याप्तमनस्कानां हृदयेषु चकास्ति वै।। ४ अनुष्टुप्

अपर्णपादुकारूढमपर्याप्तामृतामृतम्।
अर्चयामि सदा नौमि अस्मदाचार्यतल्लजम्।। ५ अनुष्टुप्

निखिलनिगमचूडासूक्ष्मतत्त्वार्थसारान्
वितरणगुणशीलं शिष्यबृन्दाय सर्वान्।
निरवधिककृपायाः नित्यधामोपमानं
श्रुतितिलकयतीन्द्रं योगिनं संश्रयामः।। ६ मालिनी

- तमे वर्षे द्वौ शिष्यौ इत्थं संभाषणं कृतवन्तौ इति कल्पना-

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रथमः - गुरूणां कश्श्रेष्ठः द्वितीयः - शिष्यहितकारी खलु सदा
प्रथमः - किमाहुस्तं प्राज्ञाः द्वितीयः - ब्रह्मणि रतोऽसौ ह्यभिमतः।
प्रथमः - इतोऽपि स्यात् श्रेयान् द्वितीयः - भागवतगोष्ठीबलयुतः
प्रथमः - वयं गच्छामोऽत्र यत्र निगमान्तयतिपतिः।। ७ मुखरिंणी

विशिष्टरचनाभिः विबुधबृन्दसंमानितां
यतीन्द्रमतदीपिकां सुगमसारवाचां सुधाम्।
श्रिया सहितरङ्गभूरमणपादुकां सञ्चिकां
प्रकाशनसुसाधको निगमकोटिसूरिर्जयेत्।। ८ पृथ्वी

भक्तानां भाग्यभूतो बहुगुणमधुरो मन्दहासेन्दुवक्त्रो
भक्तौ भक्ताङ्घ्रिरेणुर्भगवदनुभवे भक्तिसाराख्यसूरिः।
साक्षाच्छ्रीवासयोगी श्रितजनशुभदो पुष्यनक्षत्रजात्या
श्रीमद्वेदान्तरामानुजमुनितिलकस्सन्ततं पालयेन्नः।। ९
स्रग्धरा

एते ते देशिकेन्द्राः भगवनुभवे निन्युश्च समयं
एतैर्ह्याचार्यवर्यैः स्वपदबलजितो देशो विचरितः।
एते ते शिष्यवर्गान् श्रितबुधजनताः रक्षामकृषत
एते ते वेदचूडायतिपतिगुरवः तन्वन्तु सुपथाः।। १०
सुवदना

पादः पातु श्रितान्वै सुलभगुणगणश्चारुकाष्ठप्ररूढः
स श्रीवक्त्रारविन्दं ह्यतुलकरुणया कर्मसु क्लेशभीरुः।
यस्य स्वारूप्यरश्मिः वरतनुततिभिः मन्दतां तापकर्त्री
भक्तेशशर्मष्ठकस्य श्रितनतरसदो रल्लरम्याभिमादः।। ११
स्रग्धरा

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नागबन्धे (शार्दूलविक्रीडितम्)

असेतोस्सुहिमाचलाग्रमजयत् पद्भ्यां सदा सञ्चरन्
देशोऽयं सुलभस्तथा भगवतो श्रीदिव्यदेशस्थितान्।
तानभ्यर्च्य तदीयमार्गमनिशं संयक्प्रतिष्ठापयन्
आचार्योऽवतु नो गुणैर्बहुविधैः श्रीभाष्यकारैस्समः।।१२



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रव्यकाव्यभेदाः

Sri. L. ANANDHAN
Research Scholar, Dept. of Sanskrit, SCSVMV, Kanchipuram

अर्थरमणीयताधारेण श्रव्यकाव्यम् उत्तममध्यमावरादिभेदेन भिद्यते। यस्मिन् काव्ये रमणीयते व्यङ्ग्यार्थे स्यान्न तु वाच्यार्थे, तदेवोत्तमं ध्वनिकाव्यं मतम्। यत्र तु व्यङ्ग्यार्थस्य वाच्यार्थस्य च समानचमत्कारः स्यात्, तत् मध्यमकाव्यमुक्तम्। वाच्यार्थे एव यस्य चमत्कारः प्रदृश्यते, तत् अवरकाव्यमुच्यते। मम्मटेन अवरकाव्यं व्यङ्ग्यरहितमुक्तम् - **शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्।** (काव्यप्रकाशः १.५)

जयदेवेन तु व्यङ्ग्यरहितं काव्यम् अकाव्यमुक्तम्। काव्यस्य सर्वेष्वपि भेदेषु अर्थरमणीयताऽऽधारेण क्रियमाणाः उत्तममध्यमादिभेदाः उपलभ्यन्ते, यतो हि अर्थरमणीयता श्लोकस्य गद्यस्य वा कस्मिंश्चिदपि वाक्ये प्राप्तुं शक्या।

भाषायाः आधारेण काव्यवर्गीकरणमपि कतिपयाचार्यैः कृतम्। वस्तुतः वर्गीकरणमिदम् अत्यन्तं स्थूलं भवति। कवेः अभिव्यक्त्यर्थं माध्यमरूपेण या कापि भाषा योक्तुं शक्या। महाकाव्यं गद्यकाव्यं नाटकः इत्यादिकृतीः संस्कृते प्राकृते इतरासु आधुनिकभाषासु वा लिखितुं शक्याः। अतः वर्गीकरणमिदं महत्त्वपूर्णं नास्ति। भाषावदेव अवस्थादेशकालाद्याधारेणापि कृतं वर्गीकरणं स्थूलं भवति।

शैल्याधारेण श्रव्यकाव्यं त्रिधा भिद्यते - पद्यकाव्यं गद्यकाव्यं मिश्रकाव्यं चेति। छन्दोबद्धपदं पद्यमिति, छन्दोविहीनं च पदं गद्यमिति चोच्यते। गद्यपद्ययोः भेदं स्पष्टीकुर्वता आचार्येण भरतेन उक्तं यत् गद्यपदेषु अक्षराणां निश्चितं मानं नास्तीति। तानि पदानि अर्थसापेक्षाणि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भवन्ति। तानि **चूर्ण** इति शब्देन व्यवह्रियन्ते। पद्ये अक्षराणां पदानां च निश्चितं मानं भवति। अनेन, प्रत्येकमपि पदं यस्य कस्यापि वा छन्दसः अङ्गभूतं भवितुमर्हति। अङ्गिनः धर्मः अङ्गे भवति, किन्त्वस्य धर्मस्य सत्ता तदैव स्वीकृता स्याद्यदा अङ्गः अङ्गिना निबद्धः स्यात्।

अनिबद्धपदवृन्दं तथा चानियताक्षरम्।
अर्थापेक्षाक्षरयुतं ज्ञेयं चूर्णपदं बुधैः।।
निबद्धाक्षरसंयुक्तं पदच्छेदसमन्वितम्।
निबद्धं तु पदं ज्ञेयं प्रमाणनियताक्षरम्।।
छन्दोहीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितः।
तस्मात्तूभयसंयुक्ते नाट्यस्योद्योतके स्मृतम्।।

(नाट्यशास्त्रम् १४.३५, ३६ एवम् ४०)

छन्दसि चत्वारः पादाः चरणा वा सन्ति। पादरहिता पदावल्येव गद्याख्या भवति। गद्यलिखितायां कस्यांश्चित्पदावल्यां वृत्तगन्धिता भवितुमर्हति, किन्तु तत्र पद्यांशत्वं न स्वीकर्तुं शक्यं, यतो हि पद्यपूर्णता पादचतुष्टयत्वेन निर्णीयते।

पद्यं काव्यस्य बन्धस्य चाधारेण द्विविधं स्वीकृतं - प्रबन्धं मुक्तकञ्चेति। यस्मिन् काव्ये किमपि कथावस्तु सत् तस्य धारातः अन्तं यावत् अविच्छिन्नरूपेण चलति, तत् काव्यं प्रबन्धमुच्यते। इत्थं काव्यस्य प्रत्येकस्मिन् सर्गे प्रत्येकमनुच्छेदः छन्दो वा तं कथाप्रबन्धमाश्रित्य वर्तते। प्रबन्धात् भिन्नमस्य अस्तित्वं चमत्कारपूर्णं नास्ति। अस्य यथावत् विपरीतं मुक्तकाव्यमुच्यते, यस्मिन् प्रत्येकमपि पदं पद्यसमूहस्वतन्त्रं भवति, तथा स्वपूर्वापरप्रसङ्गादपि मुक्तं भवति। मुक्तकस्य एक एव श्लोकः चमत्कारमुत्पादयितुं सक्षमो भवति। अतः मुक्तकं स्वयमेव पूर्णं तिष्ठति।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पदरञ्जनी - २०

Dr. N. SRIDHAR,
SAFIC, Pondicherry

(अस्य समीचीनमुत्तरं editorsamskritasri@gmail.com प्रति ई-मैल् कर्तुमपि शक्नुवन्ति। समीचीनोत्तरप्रदातॄणां नामप्रकाशनम् अग्रिमसञ्चिकायाम्।)



वामतः दक्षिणम्

१. विष्णुः, ब्रह्मा-विष्णु-महेशश्च प्रलयकाले यस्मिन् स्वरूपे तिष्ठन्ति सः (३)

२. पिता (३)

६. कैकेयी (५)

८. जलम् (२)

९. शङ्का, नीचः (२)

११. भीमसेनः, वीरा रेणव इव यस्य (४)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१४. किरणः (३) १६. सभा (२)
१७. वायुः (२) १८. बकरूपधरः असुरः (४)
२०. द्यूतम्, धनम्, विष्णुः (२)
२२. कृपणः, मन्दः (२)
२५. मङ्गलः (२)
२६. धाव् धातुः कर्तरि लोट् उ.पु. द्वि.व. परस्मै. (३)
२९. पक्षी (२) ३०. समुद्रः (३)

उपरिष्टात् अधः

१. मेघः, केतुरिव भातीति (संबोधने) (३)
३. सदा, सर्वदा (२)
४. अपमानः (संबोधने) (४)
५. केन प्रकारेण (२)
७. लक्ष्मीः, विष्णुपत्नी (२)
८. पचनम्, क्लेदनम् (२)
९. धूलिः (२)
१०. चन्द्रवासरम् (४)
११. तरङ्गः (२)
१२. परशुरामस्य माता (३)
१३. गम्यते अनेन (२)
१५. प्रचारः, स्यन्दः, प्रकृतिः, गतिः (२)
१६. सरोवरः (२)
१८. शब्दः (२)
१९. पुत्री (२)
२०. पापम्, कमलम् जायते अस्मात् (२)
२२. परागः (२)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

२३. ओड्रपुष्पम्, जपा (२)
२५. कस्मात् प्रदेशात् ? (२)
२६. दासी, विमाता (२)
२७. मांसप्रभवधातुविशेषः (२)
२८. लवणरसत्वम् (२)

एकाक्षरम्

२१. पृथिवी २४. दाता

पदरञ्जनी - १९ (उत्तराणि)

जा[1]	न	की		चा[2]		धुः[3]	
मा			व[4]	म	नम्		प[5]
ता[6]	र[7]	का	सु	रम्		का[8]	यः
	णः		न्ध		क[9]	णः	
प्र[10]		ध[11]	रा	म[12]	रः		दा[13]
क[14]	द[15]	नम्		क		पि[16]	ता
र[17]	क्षा		म[18]	री	चि[19]	का	
णम्		वो[20]	दः		ता[21]	न	वम्
	अ[22]	टा		ता[23]		न्दः	
च[24]	रिः		अ[25]	सु	रा[26]		श[27]
मूः		व[28]	सिः		का[29]	सा	रः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

।। शिल्पम् - विद्याशङ्करमन्दिरम्, कर्णाटकराज्यम्।।

आदाय चापमचलं कृत्वाहीनं गुणं विषमदृष्टिः।
यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Registration with Registrar News Paper of India 30478 / 77

SAMSKRITASRI

मैत्रीं भजताऽखिलहृज्जेत्रीम्
आत्मवदेव परानपि पश्यत।
युद्धं त्यजत, स्पर्धां त्यजत
त्यजत परेष्वक्रममाक्रमणं
जननी पृथिवी कामदुघाऽऽ
जनको देवः सकलदयालु
दाम्यत दत्त दयध्वं जनताः
श्रेयो भूयात्सकलजनानाम्।।

Printed by: Zigma Graphics, 9/1, Thirtharappan Street, Triplicane - 5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the
Samskrit Education Society (Regd.)
Old 212/13-1, New No, 11, St. Mary's Road, R.A. Puram, Chennai - 600028.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,